चिदचिदधिपतीनां चिन्तनाय प्रबन्धान्
व्यतनुत वरदार्यः सर्वतन्त्रस्वतन्त्रः ॥

श्रीमतो नारायणस्य चरणौ उपायत्वेन उपेयत्वेनाधिगच्छतां प्रथमं कृत्यात्मभ्रमादिनिवृत्त्यर्थं तत्त्वत्रयनिरूपणं कर्तव्यमेव । तत्त्वत्रयमिति अचेतनद्रव्यं जीवं ईश्वरश्च कथ्यते ॥

End:

परमपदं गत्वा भगवदुपायनमस्ति चेत् तद्विहाय स्वानुभवपरः किं सर्वबन्धविनिर्मुक्तः । उत कर्मवशः । अन्त्ये संसार्येव । आद्ये ब्रह्मानुभवविच्छेदेन कारणं स्वाच्छन्द्यादिति तु हास्यम् । ईश्वरः स्वातन्त्र्येण निगृह्णाति चेत्तस्य निर्हेतुकनिग्रहो महान् दोषः । सकारणञ्चेत् कर्मैव कारणं तन्निवृत्तमेव । अनिवृत्तौ मुक्तिरेव न भवेत् । अतो ब्रह्मविदामेव ब्रह्मप्राप्तिरिति सर्वं समञ्जसम् ।

विमलमतिविशेषाद्वीक्ष्य हेयान् पुमर्थान्
स्थिरविनिहितबुद्धिर्यस्तु कैवल्यमुक्तौ ।
पुनरपि च भवेत्ता संसृतिस्तस्य काले
हरिहय···विभा....न्मुक्तिरेवाथवा स्यात् ॥

तस्माद्भवन्तमनवद्यमनन्तभारं
सर्वाधमीश्वरमखण्डविकुण्ठधिष्ण्यम् ।
निर्वाणधीरहमिह व्रजिनाभितप्तो
नारायणं नरसखं शरणं प्रपद्ये ॥

Colophon:

इति विश्वामित्रकुलोद्भूतेन निखिलकवितार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना वेदान्तचार्यसूनुना विरचिते रहस्यत्रयसारार्थसंग्रहे रहस्यत्रयचुलके चरमश्लोकाधिकारः संपूर्णः ॥

हरिः ॐ । श्रीमते वेदान्तगुरवे नमः ॥

Subject : Rahasyatrayaculuka 1-3 Adhikāras.

1 अष्टाक्षराधिकारः

2 द्वयाधिकारः

3 चरमश्लोकाधिकारः

Remarks:—The Ms. is in a fairly good condition. There are some leaves at the end dealing with the same topic. This is a commentary on Vedāntadeśika's Rahasyatraya. The name of the author is differently written in the two Mss. preserved here. In one he calls himself as Varadanātha and in the other as Varadarāja. In one he says he is referred to as the son of Vedāntācārya and in the other his own name is given

as Vedāntācārya. The work seems to be called also Tattvatraya cubuka. This commentary is not printed. He appears to have been a direct disciple of Vedānta Deśika as he says that he wrote this as he heard from him.

॥ रहस्यत्रयचुलुकः ॥

7802. RAHASYATRAYACULUKAḤ.

Not noticed by Dr. Burnell Ms. No. 9871 b.

Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—17. Lines—7 to a Page. Script—Grantha. No. of Granthas—380. Author—Varadarāja. Incomplete. Not printed.

Beginning:

...पर्यायते । अणुभूतस्यापि जीवस्य व्यापित्वकथनं दारुण्यग्निस्तिले[न] तैलं यथा । तद्वत् पुमानपीत्युक्तरीत्या सौक्ष्म्यातिशयात् सर्वा चेतनान्तःप्रवेशसामर्थ्यप्रतिपादनम् । अन्यथाणुत्वप्रतिपादनबहुश्रुतिस्मृतिविरोधात् ॥

End:

ननु किञ्चित्कुर्वतः शेषत्वमिति तान्त्रिकाः । अत्र फलदशायामनुभवकैङ्कर्ययोः स्वाधीनभोक्तृत्वं स्वार्थभोक्तृत्वं स्वाधीनकर्तृत्वं स्वार्थकर्तृत्वमित्येवं रूपस्वविरोधिनः पुरुषार्थान्तरेषु दृष्टस्य प्रसंगक.... ।

Colophon: (Sheet Nos. 7 and 8)

इतीरितो देशिकदत्तचक्षुषा
यथाश्रुतं वेङ्कटनाथसूरिणा ।

अपक्षयातैर्निपुणैर्निरूप्यता-

मनात्मजीवेश्वरचिन्तनाक्रमः ॥

तरळदुरवगाहात्तत्त्वदुग्धाम्बुराशेः

(य)दमृतमुदहार्षीद्वेङ्कटेशो यथावत् ।

तदिह चुलुकमात्रं साधुभिस्सावधानैः

न पुनरुपनिषेव्यस्त्वन्यमास्वादनीयम् ॥

अस्मदीयञ्चेदमन्यं पद्यं प्रबन्धपरिसमाप्तौ लिख्यते ॥—

परिणतगुरुभक्तिः पद्मनाभाङ्घ्रिपद्मं

शरणमुपगता यः शान्तसिद्धान्तवेदी ।

स हि भवति मुनीनां मुक्तसौधस्थिताना-

मपि परिषदि मान्यो भाग्यसौभाग्यशाली ॥

वरदगुरुरवादीद्वावदूकाग्रयार्यो

निजजनपरतन्त्रस्सर्वतन्त्रस्वतन्त्रः ।

चिदचिदधिपतीनां चिन्तनाचक्रमेत-

त्प्रणिहितहरिचक्रान्प्रीणयन्प्राणभाजः ॥

चिदचिदीश्वरतत्त्वनिरूपणं

वरदनायकदेशिकगुम्भितम् ।

परमपूरुषभक्तिपरायणाः

प्रतिपदं सहमवश्यत(?)सूरयः ॥

*   *

इति निखिलकवि + तत्त्वत्रयचुलुके ईश्वरनिरूपणं संपूर्णम् ।

Colophon: (Sheet No. 11.)

इति कवितार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदराजापरनाम्ना वेदान्ताचार्येण विरचितग्रन्थेषु तत्त्वत्रयचुलुके ना(आ)त्मनिरूपणं संपूर्णम् ॥

Subject: Rahasyatrayaculuka.

Remarks:—The Ms. is in good condition. The Ms. abruptly begins in the middle.

॥ वेदान्तकौस्तुभः ॥

7803. VEDĀNTAKAUSTUBHAḤ.

Burnell's Catalogue No. 6596. Page 97. Right column. Substance—Palm leaf. Size—12×6 inches. Sheets—256. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—7000. Author—Vedāntadeśika. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

इह खलु भगवान् श्रियः पतिः स्वभावतो निरस्तनिखिलदोषोऽनवधिकासङ्ख्येयकल्याणगुणः सर्वेश्वरः परमकारुणिकः अपारदुस्तरभवपयोधिनिमग्नान् पुरुषानुद्दिधीर्षुः अतिगहनगम्भीरवेदान्तवृन्दोपदर्शितपरतत्त्वपरमहितपरमपुरुषार्थगोचरविशदविशदप्रतिपत्तिं प्रापय्यताननुगृहीतुकामः श्रीमतः पराशरात् कृष्णद्वैपायनरूपेणावतीर्य वेदोक्ते[धे]तिकर्तव्यताभूतं शारीरकं शास्त्रं निबबन्ध ।

End:

युधिष्ठिराख्यधर्ममयमहाद्रुमस्य स्थैर्यवृद्ध्यादिहिरण्मयकृष्णाख्यमूलस्य लोकावगतनिरंकुशबलवीर्यसौलभ्यवात्सल्यधार्मिकजनरक्षादीक्षितत्वादिगुणगणशास्त्रसिद्धनिरङ्कुशज्ञानशक्ति...ऐश्वर्यादिगुणगणश्च कृष्णब्रह्मशब्दौ व्यञ्जयत इति तयोः अन्यतरानर्थक्यशङ्काया निरवकाशत्वात् महाभारत एव

"निर्माता सर्वलोकानामीश्वरः सर्वकर्मकृत् ॥"

यस्य नारायणपरभावतात्पर्यविश्रान्तेर्वज्रलेपायितत्वात् देवतान्तरपरभावो वादो वैदिकैर्बहिष्कार्य इति सिद्धम् ॥

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकपरवस्तुवेङ्कटेशदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य निजहृदयकमलविहरमाणश्रीरङ्गराजप्रेरितस्य कोनेट्यंबागर्भसंभवस्य वेदान्ताचार्यकृतिषु वेदान्तकौस्तुभे उपबृंहणाधिकारस्तृतीयः संपूर्णः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

Subject: Vedāntakaustubha 1-3 Adhikāras, an account of

religious and philosophic principles of Śrī Vaiṣṇava system.

Remarks:—The Ms. is in a fairly good condition. This was printed and published from Kumbakonam in 1904 in the Śaṭhagopādyācārya Sūkti Sudhānidhi Series. For details about the author see remarks under No. 7793.

॥ वेदान्तरत्नाकरः ॥

7804. VEDĀNTARATNĀKARAḤ.

Burnell's Catalogue No. 9848. Page 95. Left column.

Substance—Palm leaf. Size—15¼ × 1 inches. Sheets—154. Lines—6 to a Page. Script—Grantha. No. of Granthas —2000. Author—Rāmānuja Dīkṣita. Incomplete; wants end. Not printed.

Beginning:

शुक्लाम्बरधरं + तथाश्रये ॥

लक्ष्मीसंशोभितोरस्कं निर्धूताखिलकल्मषम् ।

... ...

... ... सद्गुणैकनिकेतनम् ।

भजे नित्यं ममाचार्यं तापत्रयनिवृत्तये ॥

रामानुजमुनीन्द्रादीन् पूर्वाचार्यान् भ.. ।

... ... संनिधास्यति ॥

श्रीवत्सान्वयसंभूतरामानुजविपश्चिता ॥

यत्नेनापि च वेदान्तरत्नाकरकृतिः सताम् ॥

प्रीत्यै स्वमतिशु............................ ।
वेङ्कटेशोऽपि च तथा स प्रीतो वरदोऽस्तु मे ॥

इह खलु भगवान्व्यासः पाराशर्यो जगति द्वापरादौ व्रामे......पुरुषोत्तमावतार...जगदुज्जिजीवयिषया...... .... ।

गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते ।
संकीर्णा.... यो देवा ब्रह्मरुद्रपुरःसराः ॥

अयमत्र शास्त्रार्थसंक्षेपः । तत्र शास्त्रप्रतिपाद्यमुपायोपेयतदङ्गात्मकम् । तत्र पूर्वकाण्डेन षोडशाध्यायेन भगवत् प्र....पासनसहकारिभूतं तदाराधनकर्म साङ्गोपाङ्गं प्रतिपाद्यते । उत्तरभागेन चाध्यायचतुष्टयात्मना साध्यरूपोपायोप....सहसिद्धोपायभूतं प्राप्यञ्च प्रतिपाद्यते ब्रह्म ।

तत्र शास्त्रस्यादिमं सूत्रम् ॥ 'अथातो ब्रह्मजिज्ञासा' इति ॥

End:

ननु ग्रहाधिकरणे "ग्रहं संमार्ष्टि" इत्यत्र उद्देश्यगतैकत्वाविवक्षांगीकृता । तन्न्यायेन प्रसिद्धबर्हिदेशरूपतयानुवादसरूपस्येदंशब्दस्यैकवचने तात्पर्याभाव इत्येव व्याख्यातुं युक्तमितिचेन्न । ग्रहाधिकरणेऽपि प्रापकवाक्यवि-

रुद्रोद्देश्यकत्वविशेषण एव तात्पर्यात् ॥

Colophon: (Leaf No. 151)

इति वेदान्तरत्नाकरे प्रथमाधिकरणे जिज्ञासासूत्रतात्पर्यार्थसंग्रहः ॥

(Leaf 13.)

इति श्रीवेदान्तरत्नाकरे श्रीरामानुजदीक्षितकलिते ब्रह्मपदस्य परोक्षलक्षणावृत्त्यनुपपत्तिनिरूपणम् ।

Subject: Vedāntaratnākara a treatise on Viśiṣṭādvaita Vedānta.

Remarks:—

Dr. Burnell has given this and the following Ms. under Advaita works.

॥ वेदान्तरत्नाकरः ॥

7805. VEDĀNTARATNĀKARAḤ.

Burnell's Catalogue No. 9847. Page 95. Left column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—99. Lines—5 to a Page. Script—Telugu. No. of Granthas—2000. Author—Rāmānuja Dīkṣitā. Incomplete. Not printed.

Beginning, end, colophon and subject—Same as No. 7804.

Remarks:—The Ms. is in a fairly good condition.

॥ वेदान्तविजयः ॥

7806. VEDĀNTAVIJAYAḤ.

Burnell's Catalogue No. 9855. Page 97. Right column.

Substance— Palm leaf. Size—17×1 inches. Leaves—193. Lines—5 to a Page. Script—Grantha. No. of Granthas—2400. Author—Rāmānujadāsa. Complete. Not Printed.

Beginning:

कुहनावचनाम्यविक्षिपन्तं
परिणीतां पुरुषोत्तमेन पत्या ।
सरसोपनिषत्समुल्लसन्ती
विजये मङ्गलदीपिकां विधास्ये ॥

वेदान्तानां विजयफणितिं श्रीमहाचार्यक्लृप्तां
श्रुत्वा योऽसौ विजयमुरलीरीतिमानन्दयुक्तः ।
तस्मै प्रादादनुपमरसामात्मलालासुधां ता-
न्नृत्यन्नस्योरसि विजयते कोऽपि गोपालबालः ॥

जयति श्रीमहाचार्यो वेदान्तार्थप्रकाशकः ।
कुहनाबद्धसिद्धान्तश्रद्धाध्वान्तदिवाकरः ॥

इत्थं वेदान्ततात्पर्यं देशिकानां प्रसादतः ।
वर्णितं मुनिमुख्यानां...नुकम्प्यताम् ॥

तथा हि ।

तद्भावोद्ग्राहिणीभिस्ते श्रुतिभिर्न्यायबन्धुभिः ।
श्रुतीनां पुरुषे भावं निरणैषुः समन्ततः ॥

ते...नां भावं विजयचतुष्टये प्रदर्शितैर्न्यायैर्न्यायान्तरस-

चिवैरुपोद्बलिताभिः सर्वासां श्रुतीनां भगवति तात्पर्यं...हि श्रुतिभिर्निरचिन्वन् । सत्रर्णधर्मानुवाकस्तावदादित्यमण्डलस्थसमुद्रान्तर्वर्तिपरत्वात् पूर्वोक्तविनियोगानुसाराच्च भगवत्परः । तत्रेदं श्रूयते । "सर्वे वेदा यत्रैकं भवंति' इति । अत्र "रामसुग्रीवयोरैक्यं देव्यैवं समजायत" इतिवत् एकशब्दः सौहार्दपरः । अनेन वाक्येन पूर्वोत्तरभागात्मकस्य कृत्स्नस्यापि वेदस्य भगवत्येव परमतात्पर्यमिति स्पष्टमवगम्यते ।

End :

शाण्डिल्यः ॥

'ग्रहे भागवतं प्राप्तमज्ञानाद्योऽवमन्यते ।
नष्टश्रीको भवेत्सद्यः क्षीणायुःपुण्यसञ्चयः ॥' इत्यपि

आश्वमेधिके त्रयोदशशततमे ।

'मद्भक्तान् शूद्रसामान्यमवमन्यन्ति ये नराः ।
नरकेष्वेव तिष्ठन्ति वर्षकोटीर्नराधमाः ॥

चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान् ।
अवमन्य पतन्त्येव रौरवे नरके नराः ॥'

श्रीभागवते ॥.........श्रीपाञ्चरात्रे ॥

'वासुदेवं तत्प्रपन्नं निन्दन्तं हि द्विजाधमम् ।
विवासयन् खरारोहं............ ॥'

.... द्रष्टव्यमिति ॥

Colophon:

इति वेदान्तविजयोल्लासे सतां लक्षणम् ॥

....पादसेवासमधिगतपरापरतत्त्वयाथात्म्येन...नामधेयेन रामानुजदासेन विरचिते वेदान्तविजये विजयोल्लासः पञ्चमः सम्पूर्णः ॥

....श्रीनिवासार्यतनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासं महागुरुम् ॥

कौशिकश्रीनिवासार्यसूनुं वेदान्तदेशिकम् ।
वात्सल्यादिगुणावासं वन्दे वरददेशिकम् ॥

अक्षरं यत्परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः क्षमा हि विदुषां धनम् ॥

Subject: Vedāntavijayollasa, a Viśiṣṭādvaitic treatise. 1-5 Ullāsas.

Remarks:—The Ms. is in a fairly good condition.

This author is otherwise called Doḍḍayācārya or Mahācārya. He is also the author of many works of whom Pārāśaryavijaya, a commentary on Brahma Sūtras, Caṇḍamāruta a commentary on the Śatadusaṇī and Vedāntadeśikavaibhavaprakāśikāstotra are important. All of them are published but this work yet remains unpublished.

॥ वेदान्ताचार्यमतम् ॥

7807. VEDĀNTĀCĀRYAMATAM.

Burnell's Catalogue No. 6176. Page . Left column

Substance—Paper. Size—10×4⅛ inches. Sheets—8. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—? Incomplete. Not Printed.

Beginning:

श्रीमद्गुरुभ्यो नमः ॥

श्रीमद्वेदाचार्यमतं श्रीवद्रामानुजमुनिभिरुक्तमुपलिख्यते(?)। तत्राशेषचिदचिच्छरीरपरमात्मा श्रीपतिरेव शास्त्रस्य प्रधानप्रतिपाद्यो विषयः। नित्यनैमित्तिकवर्णाश्रमधर्मानुगृहीतया तदुपासनया देशविशेषप्राप्तिपूर्वकं तत्साम्यं प्राप्तस्य परिपूर्णब्रह्मानुभवो मोक्षः परमप्रयोजनम्।

End.

सर्वशब्दवाच्यत्वं चानुप्रविश्य नामरूपव्याकरणेन नामरूपभाक्त्वात् 'वचसां वाच्यमुत्तमम्' इत्यादि प्रमाणाच्च सिद्धम्। निर्गुणश्रुतिश्च प्राकृतहेयगुणाभावविषयिणी। एकयैव श्रुत्या शोकजरादिदोषान् प्र...।

Subject: Vedāntācāryamata, a summary of the Vaiṣṇava doctrine as propounded by Veṅkaṭanātha Vedāntācārya.

Remarks:—The Ms. is in a fairly good condition.

For remarks see under No. 7793.

॥ शतदूषणी ॥

7808. ŚATADŪṢAṆĪ.

Burnell's Catalogue No 9761. Page 110. Right column. Substance—Palm leaf. Size—15¾ × 1¼ inches. Leaves—200 (1-317 of which 1-17 wanting). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—3000. Author—Vedāntadeśika. Incomplete. Printed.

Beginning:

...कुतश्चिदिति न प्रथमः । मन्त्रत्पक्षे वृत्तिरूप......

परपक्षेत्त्वात्मविशेषगुणस्यास्मत्पक्षे तु तदक[illegible]विशेषरू-

पस्य— न तयाभाव्यत्वसिद्धेः । आहुश्च

कादाचित्कात्मभावस्य भाव्यत्वं केन वार्यते ।

तस्याकारणजन्यत्वे चार्वाकमतचर्वणम् ॥'

इति न द्वितीयः ॥

End:

यत्पुनर्विषं भुङ्क्ष्वेत्यादिषु सर्पपदलक्षणा दृष्टेति तदपि न भुङ्क्ष्वेत्य.........त्यत्रापि मुख्यत्वात् विषय-शब्देनैव ह्यनर्थकरभक्ष्यरूढेन भुज्यमानेन ....षेन तदर्थ-हेतुतया......भुङ्क्ष्वेत्यत्र प्रकृत्या निषिद्धभोजनं विवक्षितं विषशब्देन तन्निषेध........ ।

Colophon:

इति शतदूषण्यां जीवेश्वरैक्यभंगोऽष्टत्रिंशः ।

Subject. Śatadūṣaṇī, a work which unfavourably criticises the Advaita and some other views which differ from Rāmānuja's Viśiṣṭādvaita.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell has noticed this Ms as an unidentified fragment at the end of the Mādhva Section.

For detailed remarks about the author see under No. 7793. This work is one of the greatest of Viśiṣṭādvaitic polemical works. The work has been published with the commentary Caṇḍamāruta in the Śāstramuktāvali Series, Conjivaram.

॥ शतदूषणी ॥

7809. ŚATADŪṢAṆĪ.

Burnell's Catalogue No. 9870. Page 91 Left column. Substance—Palm leaf. Size—14×2 inches. Leaves— Lines—10 or 11 to a Page. Script—Telugu. No. of Granthas—4500. Author—Vedāntadeśika. Incomplete. 1-39 Vādas only. Printed.

Beginning:

ब्रह्म परं धामवानिति स्तुत्यनुपपत्तिः 'पवित्रं परमं परम्' इत्यादि समभिव्याहारवैफल्यञ्च निर्विशेषलक्षणया तु स्तुतिर्न कथञ्चिदपि संभवति। गुणावच्छिन्नगुणाभि- धानरूपत्वात्तस्या इति पूर्वापराधिविसंवादाच्च न कुत्रापि निर्गुणासिद्धिः ॥

End:

न च तरसाहसिकानां पश्यतोहराणां भवतामपी-

ष्टम् । .. ...अ ..सिद्धानन्तर्यादिनियमाधिगमादन्यत्र वा प्रसिद्ध्यानन्तरभाविविशिष्टवाक्यार्थबोधं प्रति कारणत्वं प्रत्यक्षत एव सिद्धम् । बाधाशङ्का तु प्रागेव निरस्तामिति स्तेति । अतः सिद्धं सखण्डपरं 'तत्त्वमसि सत्यम्' इत्यादिवाक्यमिति ।

Colophon:

इति शतदूषण्यामखण्डवाक्यार्थखण्डनवाद एकोनचत्वारिंशः ॥

त्यागेशाय नमः ॥ श्रीवेङ्कटेशाय नमः ॥

Subject: Śatadūṣaṇī 1-39 Vādas

Remarks:—The Ms. is in a fairly good condition.

॥ स्तोत्ररत्नभाष्यम् (सव्याख्यं) ॥

7810. STOTRARATNABHĀṢYAM (SAVYĀKHYAM).

Burnell's Catalogue No. 9898. Page 98. Left column. Substance—Palm leaf. Size—20 × 1½ inches. Leaves—79. Lines—8 to a Page. Script—Grantha, No of Granthas—2500. Author—Vedānta Deśika. Incomplete, wants beginning. Printed.

Beginning:

आम्नाये तु यदाह 'भगवत्येवं वक्तारि वृत्तिः' इति ।

अमानित्वादीन् सम्यग्ज्ञानहेतून् प्रक्रम्य गीयते च ।

End:

तेषु स्वरक्षणहेतुषु भगवत्कटाक्षविशेषजनितः सदाचार्यसंबन्ध एव प्रधानतम इति निर्धार्य तदधीनभगवत्प्रसादेन निर्भयः प्रष्टव्यश्चासि.... ।

Colophon:

इति किल निगमान्तभागधेय-
स्तुतिपरिवाहसमीक्षया महत्या ।
अलभत परमं पदं मुरारे-
रनघमनोरथ एष यामुनेयः ॥

कथिताकथिते विभाव्य सद्भि-
स्सदसद्भिर्विभिर...वधानैः ।
बलवत्प्रथितप्रमाणदृष्ट्या
बहुमन्तव्यमिदं यदस्मदुक्तम् ॥

उपनिषदुपधेयस्तोत्रतात्पर्यमेत-
द्यतिपतिरवदद्यत् यामुनार्यस्य भावम् ।
अहमिह तु नियुक्तः सद्भिराचार्यनिष्ठै-
रधिगतशुकवृत्तिर्व्याक्रियामन्वभूवम् ॥

स्वकामिति हरिदत्तं यामुनस्तोत्रवृत्त्या
व्यवृणुत निगमान्ताचार्यकं वेङ्कटेशः ।

कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ॥

हरिः ॐम्

स्तोत्ररत्नभाष्यं सम्पूर्णम् ॥

சின்னதுரை வெங்கடஅரயபத்து ஸ்ரீம் இநத ஸ்தோத்ரபாஷ்யம் எழுதினமைக்கு கயற்றூர் வெங்கடாத்ரிஸ்வாமியன்புஸ்தகம் வெங்கடேசன் எழுத்து.

Subject: Stotraratnabhāṣya, a commentary on Stotraratna of Yāmunācārya.

Remarks:—The Ms. is in a fairly good condition. There are six stray leaves which deal with the same topic. Stotraratna is a work of the great Yāmunācārya, the predecessor and Guru of Rāmānuja, who is otherwise called Āḷavandār. The work is also otherwise called Āḷavandār Stotra mistakenly called Ālamandara stotra in the Guzratī translation of the work. The famous Vedāntadeśika himself wrote a commentary on this Stotra and the work along with the commentary has been published in Viśiṣṭādvaita Granthratnamāla at Madras. This Ms. contains a super-commentary on Vedāntadesikā's commentary but this has not been published. It might be that this author is the same as the author of Siddāntaratnāvalī noticed under No. 7811. Yāmunācārya was a contemporary of Rāmānuja in his later years and so flourished in the latter part of 10th and earlier part 11th centuries.

॥ सिद्धान्तरत्नावली ॥

7811. SIDDHĀNTARATNĀVALĪ.

Burnell's Catalogue No. 9864. Page 98. Left column.

Substance—Palm leaf. Size—18¼ × 1¾ inches. Leaves—112. Lines—9 to a Page. Script—Grantha. No. of Gran-

thas—4000. Author—Veṅkaṭācārya. Complete. Not printed.

Beginning:

ॐ नमो वासुदेवाय ॥

समुद्यत्कस्तूरीतिलकसमुदञ्चन्मुखरुचिं
किरीटप्रागल्भ्यस्फुरितपरमैश्वर्यविभवम् ।
रमापादाम्भोजद्वितयगतलाक्षारसलस-
त्कुजामध्यं नित्यं मनसि कलये रङ्गनिलयम् ॥

प्रपञ्चितं भगवत्कारणत्वमसहमानस्य परस्य प्रक्रिया निराक्रियते । यदाह कश्चित् न विष्णोः परमकारणत्वं सिद्ध्यतीति । विष्णोरपि जनकभूतस्य परमशिवस्य सर्वैश्वर्यमुमुक्षूपास्यत्वकारणत्वप्रतीतेः । तथा हि । अथर्वशिखायां 'किं तद्ध्यानं को वा ध्याता कश्चिद्ध्येयः' इति उपक्रमस्य प्रश्नत्रयानुरोधेन ध्यानध्यातृनिरूपणानन्तरं ध्येयनिर्धारणार्थमिदमाम्नायते । "ध्यायीतेशानं प्रध्यापितव्यं सर्वमिदं ब्रह्म विष्णु × ×

शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य समस्ताथर्वशिखा" इत्यन्तम् । अत्र योगरूढ्या परमशिवे वर्तमानस्य ईशानशब्दस्य ताच्छील्यार्थे च न शक्ततया योगेन स्वाभाविकैश्वर्यपरत्वाद्रूढ्या परमशिववाचित्वाच्च सर्वोत्कृष्टफलार्थिभिः सर्वातिशाय्यैश्वर्यः परमशिवो ध्या-

तस्य इति भावेनेशानपदेन विशेष्य निर्देशः कृतः ।
प्रध्यायितव्यमित्येनाधिक्येन ध्यानार्हत्वेन स्तुतिः ।

End:

येषां धर्माराधकत्वं तेषां स्थाननिर्देश इत्यत्र नियामकाभावेन स्थाननिर्देश...योर्देवशब्देन ग्रहणाग्रहणयोरनियामकत्वादगस्त्योपासनाप्रीतानामपि देवानां कालविशेषे प्रेम्णा तदाश्रमे कश्चित् कालमवस्थितिसं ..तस्मादेतादृशक्षुद्रकाशावलम्बने न शिवपारम्यै रामायणस्य तात्पर्यमस्तीति वर्णयितुमशक्यत्वात् पूर्वोदाहृतभूयस्तरवचनानुरोधात् भगवत्पारम्यतात्पर्यकत्वमेवेति सकलमहाजनपरिग्रहावगतप्रमाणमूर्धन्यभावश्रीमद्रामायणानुसारित्वान् सात्त्विकपुराणानां प्राबल्यमिति तैरेवोपनिषदुपबृंहणस्य कर्तव्यतया तदनुसारेण श्रुतीनां भगवत्येव तात्पर्यमिति शिवहिरण्यगर्भादिविभूतिकश्रीमन्नारायण एव जगत्कारणं ब्रह्मेति सिद्धम् ॥

Colophon:

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्याधीतहृदयकमलश्रीतातार्यनन्दनस्य हयवदनकरुणाकटाक्षवीक्षालब्धपदवाक्यप्रमाणसारस्य श्रीमन्निगमशिखरगुरुचरणसरसीरुहषत्पदीकायमाणमानसस्य श्रीवेङ्कटदेशिकपादसेवासमधिगतश्रीमच्छारीरकमीमांसाभाष्यहृदयस्य वेङ्कटाचार्यस्य कृतिषु सिद्धान्तरत्ना-

वल्यां द्वितीयः परिच्छेदः ॥ हरिः ॐ । श्रीमच्छ्रीशैलपूर्ण-
कुलतिलकशतक्रतुचतुर्वेदि श्रीमद्वेंकटाचार्यमहागुरवे
नमः। श्रीमत्तातगुरवे नमः ॥

Subject : Siddhāntaratnāvali a treatise on the accepted conclusions of Viśiṣṭādvaita. I & II Paricchedas.

Remarks:—The Ms is in a fairly good condition. The author of this work was a native of Kumbakonam and his father was the Rājaguru of Naik Kings of Tanjore. His descendants are still living in the Pāṭṭarācarya street and is the author of works like Kokilasandeśa and Pārijātaharaṇa.

His father's full name was Caturvedi Śatakratu Śrīnivāsa Kumāra Tātācārya and this author was also known as Veṅkatārya. His Kokilasandeśa and Nigamānta Deśikanāmāṣṭottaraśatam were published at Kumbakonam, but this work has not been published. The author was a desciple of Veṅkata Deśika. This author might have flourished in the latter part of the seventeenth century A. D.

सिद्धान्तरत्नावली ॥

7812. SIDDHĀNTARATNĀVALĪ.

Burnell's Catalogue No. 6195. Page 98. Left column, Substance—Palm leaf. Size—18¾ × 5¼ inches. Leaves—102. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2800. Author—Venkaṭācārya. Incomplete. I Pariccheda only. Not Printed.

Beginning:

श्रीगुरुभ्यो नमः । श्रीमदाचार्यास्तु ॥

यतो वा इमानीत्यादिना जगत्कारणं ब्रह्मेत्यवगम्यते । तच्च कारणं किमित्यपेक्षायां कारणप्रतिपादकवाक्यान्तर-पर्यालोचनेन कारणं निर्धार्यम् । एवञ्च तत्प्रापकवाक्या-न्वेषणे सति छान्दोग्ये 'सदेव सोम्येदमग्र आसीत्' इति कारणं सच्छब्दवाच्यमिति प्रतीयते ।

End:

अतः शिवस्य कर्मवश्यत्वाभावो नानया श्रुत्या सि-द्धिः । भगवतस्तु कर्मवश्यत्वाभावो 'अजायमानो बहुधा विजायत' इत्यादिभिः प्रमाणैः सिध्यतीत्युपपादित-मिति भगवत्कारणत्वावेदकानां नायोग्यार्थत्वप्रसक्तिग-न्धोऽपीति निष्कण्टकोऽयं घण्टापथः ॥

Colophon:

इति श्रीशठमर्षणकुलतिलक + वेङ्कटाचार्यस्य कृतिषु सिद्धान्तर-त्नावल्यां प्रथमः परिच्छेदः ॥

श्रीवेङ्कटेशाय नमः ॥

Subject: Siddhāntaratnāvalī. I Pariccheda only.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this work is available in this library. See T. V. No. 461.

॥ महाभारततात्पर्यसंग्रहः ॥

7813. MAHĀBHĀRATATĀTPARYA-SAṄGRAHAḤ.

Burnell's Catalogue No. 11896 Page 184. Right column.

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Sheets—44. Lines—9-10 to a Page. Script—Grantha. No. of Granthas—2000. Author—Varadācāryaśiṣya. Incomplete. Not Printed.

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

कुर्याच्छ्रेयांसि भूयांसि मम श्रीरंगनायकः ।
यत्पदाम्भोरुहध्यानमशेषपुरुषार्थदम् ॥

वेदाचार्यमहं वन्दे कृष्णद्वैपायनं मुनिम् ।
वेदोपबृंहणार्थाय भारतं येन निर्मितम् ॥

वाधूलवरदाचार्यश्रीमुखाम्भोरुहाच्छ्रुतम् ।
महाभारततात्पर्यं विशदीक्रियते मया ॥

विष्णौ भारततात्पर्यमित्यत्र प्रतिपादिताः ।
हेतवोऽष्टादशश्रान्यैः प्राचीनैश्शिष्टसम्मताः ॥

तथाप्यस्यान्यतात्पर्ये न्यायाभासाः प्रदर्शिताः ।
कैश्चिदाधुनिकैस्तासामाभासत्वं प्रकाश्यते ॥

End :

तच्छृणुष्व महाराज विष्णुप्रोक्तं कुरूद्वह ।

तेन गच्छसि... ।

Colophon:

आश्वमेधिकपर्वसंग्रहः समाप्तः ॥

वेदान्तगुरवे नमः ॥

Subject : **Mahābhāratatātparyasaṅgrahaḥ.**

Remarks :—The Ms. is in good condition. It is evident that it has been transcribed by two different scribes. The author's name is not mentioned. But the author says that he is a desciple of Vādhūla Varadācārya. There are many works with the name Bhāratatātparyasaṅgraha, chief among them being by Ānandatīrtha and Appayya Dīkṣita. This work is not printed. The purpose of the work is to establish Viṣṇu as the Supreme Being.

॥ द्वैतम् ॥

DVAITAM.

1. Major works of Ānandatīrtha and the commentaries thereon.

2. Minor works of Ānandatīrtha and the commentaries thereon.

3. Major works of other authors.

4. Minor works of other authors.

॥ ब्रह्मसूत्रभाष्यम् ॥

7814. BRAHMASŪTRABHĀṢYAM.

Burnell's Catalogue No. 5749. Page 101. Left column. Substance—Paper. Size—$6\frac{1}{2} \times 3$ inches. Sheets—185. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ ॐ ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।

ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥ १ ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार ।

"एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ।

ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ॥

ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः"

इत्यादि ॥

अथातो ब्रह्मजिज्ञासा ॥

ॐ ॥ अथ शब्दो मङ्गलार्थः । अधिकारानन्तर्यार्थश्च ।

अतःशब्दो हेत्वर्थः ।

End:

॥ ॐ ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

'न च पुनरावर्तते न च पुनरावर्तते'। 'सर्वान् कामा-
नाप्त्वामृतः समभवत्समभवन्'इत्यादिश्रुतिभ्यः ॥ ११ ॥

ज्ञानानन्दादिभिः सर्वैः गुणैः पूर्णाय विष्णवे ।
नमोऽस्तु गुरवे नित्यं सर्वथाऽतिप्रियाय मे ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् ।
वायोरामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि ॥

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

Colophon :

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ-
भगवत्पादविरचिते चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥

श्रीकृष्णार्पणमस्तु ॥ समाप्तश्चायं ग्रन्थः । श्रीरस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Brahmasūtrabhāṣya.

Remarks :—The Ms. is in good condition.

Ānandatīrtha is otherwise known as Madhvācārya. He is the founder of the Dvaita system of philosophy. His Brahma

Sūtra Bhāṣya is printed in various places as Bombay, Madras, and Kumbakonam but by far the best edition is from Government Oriental Library, Mysore where it is published along with Jayatīrtha's super-commentary Prakāśa thereon and a couple of glosses on Prakāśa by Vyāsatīrtha and Rāghavendratīrtha in 4 Vols. This work is translated into various languages including an English translation by Mr. S. Subba Rao under the name Pūrṇa-Prajña-Darśana published in Madras in 1904.

BRAHMASŪTRABHĀṢYAM.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7815	B. L.	5750	Paper.	$6 \times 4\frac{1}{4}$	206	9 or 10	Devanāgarī.	Complete.
7816	,,	5751	,,	8×4	70	11 or 12	,,	,,
7817	,,	5752	,,	$10 \times 4\frac{1}{2}$	74	$10 \times 4\frac{1}{2}$	,,	,,
7818	,,	5753	,,	$11\frac{1}{2} \times 5$	66	11	,,	,,
7819	,,	5754 a	,,	13×5	70	10	,,	,,
7820	,,	5755 b	,,	$16\frac{3}{4} \times 8\frac{3}{4}$	30	20	,,	,,
7821	,,	6201	,,	$7\frac{1}{8} \times 2$	237	5	,,	,,
7822	,,	6513	,,	$13\frac{3}{4} \times 5\frac{3}{4}$	96	10	,,	,,
7823	,,	6514	,,	$12\frac{5}{8} \times 5$	106	9 or 10	,,	,,
7824	,,	9698	Palm leaf.	$14\frac{1}{2} \times 1\frac{1}{4}$	138	5	Grantha.	,,
7825	,,	6238	Paper.	$8\frac{1}{2} \times 1\frac{1}{2}$	16	20-22	Devanāgarī.	Incomplete.

DETAILED REMARKS

on the

BRHAMASŪTRABHĀṢYA MSS. IN THE ABOVE TABLE.

7815 Colophon:—

इति श्रीमत् + कृष्णद्वैपायन + चतुर्थस्याध्यायस्य चतुर्थः पादः । श्रीभारतीरमणहनूमत्भीममध्वात्मकश्रीमुख्यप्राणान्तर्गतश्रीरामकृ- ष्णवेदव्यासात्मकश्रीलक्ष्मीनारायणार्पणमस्तु । अनेन श्रीमद्भाष्य- लेखनेन भगवच्छ्रीमध्वाचार्याणां हृत्पद्मनिवासी श्रीमद्वेदव्यासः प्रीयताम् श्रीकृष्णार्पणमस्तु । अन्तरायो मास्तु । यादृशं पुस्तकं + न विद्यते ॥ व्ययनामसंवत्सरे उत्तरायणे शिशरर्तौ माघमासे शुक्लपक्षे ब्रह्मसूत्रभाष्यं स्थिरवासरे लिखितं समाप्तम् ।

7817 Colophon:—

इति + चतुर्थः पादः ॥

खरभसकरवेग + क्षन्तुमर्हन्ति सन्तः ॥ संवत्शके १६६० वर्षे कालयुक्तनामसंवत्सरे दक्षिणायने शरदृतौ अधिकाश्वयुजमासे कृष्णपक्षे द्वितीयायामिन्दुवासरे तञ्जापुरक्षेत्रे श्रीलक्ष्मीनरासिंहस- न्निधौ इदं पुस्तकं समाप्तम् ।

The Ms. is dated A. D. 1608.

7818 Colophon:—

इति + चतुर्थः पादः ॥ अध्यायः समाप्तः ॥

गाङ्गमङ्गलतरङ्गभङ्गद

प्राग्तसुभिहरिवे ......कृत्समः ।

यद्गतैकतमवर्णलेखकः

भाष्यमेतदखिलं सुसाख्यदम् ॥

श्रीरस्तु पठकपाठकलिखितलेखकानाम् ।।

7819 The other work herein is :—अणुभाष्यम्

7820 The other work herein is :—ब्रह्मसूत्रम्

॥ ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वप्रकाशिका ॥

7826. BRAHMASŪTRABHĀṢYAVYĀKHYĀ-TATTVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 5759 Page 101. Left column. Substance—Paper. Size—10½ × 8½ inches. Sheets—820. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—8000. Author—Jayatīrtha. Complete. Printed.

Beginning :

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ हरिः ॐ ॥

शुद्धानन्दोरुसंविद्द्युतिबलबहुलौदार्यवीर्यादिदेहं

चिन्तासन्तापलेपोद्भवमृतिमुखराशेषदोषातिदूरम् ।

सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगा-

द्रम्यं वन्दे मुकुन्दाभिधममलमलं ब्रह्म वेदान्तवेद्यम् ॥ १ ॥

End:

मध्वदुग्धाब्धिसंभूतभाष्येन्दूदितकौमुदी ।
भूयात्सत्कुमुदानन्ददात्री तत्त्वप्रकाशिका ॥ ३ ॥

Colophon.

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीब्रह्मसूत्रभा-
ष्यस्य टीकायां श्रीमज्जयतीर्थकृतायां तत्त्वप्रकाशिकायां
चतुर्थाध्यायस्य चतुर्थः पादः । चतुर्थाध्यायः समाप्तः ॥

श्री गोपालकृष्णाय नमः ।

दंबलानन्दतीर्थार्यशर्मणा परिशोधिता ।
तत्त्वप्रकाशिका भूयात् प्रीत्यै माधवमाध्वयोः ॥

लोलत्फालाक्षिनिर्यन्निविडविलसितज्वालिकाजालवेला-
तीताध्यूहचक्रानलकरणकिरणैर्ह्रोष्यमाणारिवर्गः ।
दैत्योरोदारणातिप्रकटितलसितांत्रौघमालाधरोयं
भूयाल्लक्ष्मीनृसिंहः कलितसुरसुखः श्रेयसे भूयसे नः ॥

श्रीनन्दनन्दनाय कृष्णाय नमः ॥

Subject: Brahmasūtrabhāṣyavyākhyā, otherwise known as Tattvaprakāśika.

Remarks:—The Ms is in a good condition. This is the best known commentary on the Brahma Sūtra Bhāṣya of Ānandatīrtha and in its turn has evoked several glosses. This work is printed along with Ānandatīrtha's Bhāṣya in the Government Oriental Library Series Mysore and also at Kumbakonam along with a couple of glosses. Jaya Tīrtha is the disciple of Padmanābha Tīrtha and Akṣobhya Tīrtha. He is a voluminous writer on Dvaita system and is considered to be an authority on the system after Ānandatīrtha.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—TATTVAPRAKĀŚIKĀ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7827	R. L.	5760	Paper.	10½ × 4	323	9	Devanāgarī.	Complete.
7828	,,	5761	,,	13 × 5¼	218	11 or 12	,,	,,
7829	,,	5769	,,	9½ × 4	92	9	,,	First Adhyāya.
7830	,,	5770	,,	9⅓ × 4¼	26	7 or 10	,,	,,
7831	,,	5763	,,	9½ × 3½	20	8	,,	I. 1.
7832	,,	5771	,,	9¼ × 4	213 (47-259)	8	,,	I. 1 to II. 4.
7833	,,	5768	,,	10 × 3¾	98 (12-104)	9 or 10	,,	I. 1.—4.
7834	,,	5764	,,	9¼ × 3¾	94	9	,,	Second Adhyāya.
7835	,,	5765	,,	9⅛ × 4	94	9	,,	Third ,,
7836	,,	5762	,,	6⅛ × 4	113 (134-246)	10	,,	III. 4 to IV. 4.

7837	,,	5767	,,	10×8¾	61 (277-878)	9 or 10	,,	Do.
7838	,,	5766	,,	9¼×8⅞	36	9	,,	Fourth Adhyâya.

DETAILED REMARKS
on the
BRAHMASŪTRABHĀṢYAVYĀKHYĀ TATVAPRAKĀŚIKĀ MSS. IN THE ABOVE TABLE.

7827 Colophon—

इति चतुर्थोऽध्यायः समाप्तः ॥

अस्य संवत्सरस्य कल्यब्दाः ॥ ४८०१ ॥ शालिवाहनशकाब्दा १६२२ (or A D. 1770) तदुपरि विक्रमनामसंवत्सरे श्रावणमासे सितपक्षे पञ्चमी भौमवासरे श्रीमत् राजश्री तिंमाजिपण्डितयर पुस्तकमिदम् तत्त्वप्रकाशिकानाम संपूर्णम् ॥

श्रीमध्वेशार्पणमस्तु ॥

7837 Colophon—

इति + चतुर्थाध्यायः समाप्तः ॥

व्यासराजतनूजेन रघुनाथेन सादरम् ।
लिखिता प्रीतये विष्णोः भूयात्तत्त्वप्रकाशिका ॥

॥ तत्त्वप्रकाशिकाव्याख्या—भावबोधः ॥

7839. TATTVAPRAKĀŚIKĀVYĀKHYĀ—BHĀVABODHAḤ.

Burnell's Catalogue No. 5797. Page 101. Right column. Substance—Paper. Size—12 × 4 inches. Sheets—249 (81-280). Lines—11 to a page. Script—Devanāgarī. No. of

Granthas—8184. Author—Raghūttamayati. Incomplete. Wants beginning. Not printed.

Beginning:

...गयो इदमपि जात्यपेक्षया आकाशप्राणाधिकरणयोः सिद्धान्तसाधकयुक्त्यभावेन केवलस्य लिङ्ग...स्यैव तवो· पयोगः समग्रस्य तु गायत्र्यधिकरण इति विवेकः।

× ×

॥ ओं प्राणस्तथानुगमात् ॥ ओम् ॥

End:

राम वचासि यो नय इति ॥ अनेन रामवचासि नयो यस्य तदिति बहुव्रीहिरित्युक्तं भवति।

भीमस्तु बहुभुक्पिशो:(?) पृतनाक्षयकारि च ॥

द्वितीयस्त्वतिप्रमाणानुसारेण पृष्ठो द्वितीयो वपुरित्येत- द्व्याचष्टे। द्वितीयं वपुरित्यादिना। मध्व इत्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतमिति प्रमाणानुसारेण मध्वशब्दार्थमाह।

आनन्दरूपस्य हरेरिति।

रघुवर्यगुरुप्रोक्तो भावो जयमुनेर्यथा।

लिखिता मन्दबोधार्थं प्रीयतां श्रीपतिस्ततः ॥

Colophon:

इति श्रीमद्रघुवर्यतीर्थपूज्यपादशिष्य रघूत्तमयतिकृते तत्त्वप्र- काशिकाभावबोधे चतुर्थाध्यायस्य चतुर्थः पादः ॥

श्रीकृष्णार्पणमस्तु ॥ श्री वेदव्यासाय नमः ॥ रामाय नमः ॥

रामचन्द्राय नमः । कस्कृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

रामचन्द्राय नमः

Subject: Tattvaprakāśikābhāvabodha. I. 1—27 to IV—4.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly breaks off at the close of the III Adhyaya.

This author is the disciple of Raghunāthayati and is the author of this commentary on Jayatīrtha's Tattvaprakāśikā which is a commentary on Ānandatīrtha's Brahmasūtrabhāṣya. He is also the author of another work by name Vivaraṇoddhāra which is also a gloss on Jayatīrtha's Tattvaprakāśika wherein he says that Jayatīrtha himself has commented upon the first 2½ pādas of the first Adhyāyā. He is the author of a gloss on Ānandatīrtha's Bṛhadāraṇyakabhāṣya. Both this and the Vivaraṇoddhāra have not been printed. He is also the author of a commentary on Ānandatīrtha's Anuvyākhyā called Nyāyavivaraṇa which also he calls Bhāvabodha. Bhāvabodha seems to be the general name of his commentaries.

॥ तत्त्वप्रकाशिकाव्याख्या—भावबोधः ॥

7840. TATTVAPRAKĀŚIKĀVYĀKHYĀ—BHĀVABODHAḤ.

Burnell's Catalogue No. 5796 Page 101. Right column.

Substance—Paper. Size—10×4½ inches. Sheets—160 Lines—8-12 to a Page. Script—Devanāgarī. No. of Granthas—3700. Author—Raghūttamayati. Incomplete. Not printed.

Beginning :

श्री वेदव्यासाय नमः ॥ हरिः ॐ ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॐ ॥

उक्तः समन्वयः साक्षादित्यनुव्याख्यानानुसारेण उक्तोऽर्थ इति भाष्याभिप्रायमाह । अशेषशास्त्रप्रामाण्येनेति । अत्र जगज्जन्मादिकर्तृत्वादिति विष्णुधर्मस्य स्मृत्यनवकाश इत्यादौ साक्षान्न विलक्षणत्वादित्यादौ तु वेदप्रामाण्याक्षेपमुखेन युक्त्यादिविरोधपरिहारस्य क्रियमाणत्वादेवमुक्तम् । अन्यथा हरिरित्येव वक्ष्यतु जगज्जन्मादिकर्तेत्युपलक्षणम् । अनन्तगुणपरिपूर्णः । अशेषदोषविधुरः । इत्यपि ग्राह्यम् । तेन धर्मोपपत्तेश्चेत्यादिरप्यध्यायान्तर्भावलाभ इति भावः । तस्य युक्त्यादिविरुद्धत्व इति ॥

End :

तत्राद्ये सार्वकालिकसार्वदेशिक सृष्ट्याद्यष्टककर्तृत्वसमर्थनम् । द्वितीये तन्मध्यपतितफलदातृत्वसमर्थनमिति ।

Colophon :

इति श्रीमद्रघुवर्यतीर्थपूज्यपादशिष्य रघूत्तमयतिकृतौ तत्त्वप्रकाशिकाभावबोधे तृतीयाध्यायस्य द्वितियः पादः समाप्तः ॥

श्री कृष्णार्पणमस्तु ॥

Subject : Tattvaprakāśikābhāvabhodha, II. 1 to III. 2.

Remarks :—The Ms. is in a fairly good condition. This Ms

abruptly breaks off at the end of the second Pāda of the III Adhyāyā.

॥ तत्त्वप्रकाशिकाव्याख्या— विवरणोद्धारः ॥

7841. TATTVAPRAKĀŚIKĀVYĀKHYĀ—VIVARAṆODDHĀRAḤ.

Burnell's Catalogue. No. 5808. Page 102. Left column.
Substance—Paper. Size—11⅞ × 3¼ inches. Sheets—153. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Raghūttamayati. Incomplete. Not printed.

Beginning:

गुणादिसद्रत्नयुतं क्षयादि

दोषोज्झितं वेदनदीभिराप्यम् ।

कृपापयस्कं हरिदुग्धवार्धिं

श्रये स्वपादप्लवमुक्तगम्यम् ॥

सुज्ञानप्रभया स्वस्य परेषाञ्च प्रकाशकम् ।

भजतामिष्टदं व्यासचिन्तामणिमहं भजे ॥

सीतेशकंसान्तकवासवीसुतान

कपीशभूमीशमुनीशरूपान् ।

अहीशवीशेशनुतेन वायुना

नुतान्नमस्थे प्रणतेष्टदान् सदा ॥

वेदभेदविविधारे...शाखं
बोधपूर्वकगुणाद्यफलं तम् ।
आदरेण भजतां फलदं श्री-
मोदतीर्थसुरभूरुहमीडे ॥ ३ ॥

सुगुणनरहरिश्रीमाधवाक्षोभ्यतीर्थान्
हरिभजननियुक्तान् शुद्धधर्मार्थकामान् ।
सुजननियमनार्थं यः प्रसाध्याद्यमोक्षं(?)
स भवतु मम भूत्यै पद्मनाभाख्ययोगी ॥ ४ ॥

तारकूर्मधृतमध्वशुद्धगी-
र्मोगवेष्टितसुसूत्रभूभृता ।
यो विमथ्य निगमोदधिं सुधा-
माप तं जयमुनीन्द्रमाभजे ॥ ५ ॥

मध्वोक्तिद्युनदीजयार्यशुभवाक्सूर्यात्मजासंगमे
व्याख्यास्नानमहो विधाय नृहरेः प्राप्य प्रसादं परम् ।
प्रापुर्ये कृतकृत्यतां गतमलाः विद्याधिराजादयो
योगीशाः कृपयन्तु ते जयमुनेर्भावस्य बोधाय मे ॥ ६ ॥

वेदव्याससरोवरे समुदिते वेदोरुनालस्थिते
मध्वोक्तिश्रिय आलये विकसिते गोभिर्जयेनस्य तु (?) ।
सद्वाक्यादिसुपत्रपूर्वकयुते गुर्वांशुगादर्शिते
सूत्राब्जे रघुनाथमुन्यलिवरं वन्दे सुपक्षान्वितम् ॥

श्रीमध्वशास्त्रं समुदीर्य मेऽस्मिन्
विश्वासहेतोः समदर्शयद्यः ।
प्रदानसूत्रप्रतिपाद्यमादौ
वन्दे गुरुं तं रघुवर्यसंज्ञम् ॥ ८ ॥

तत्त्वप्रकाशिकागूढं विचार्य गुरुणोदितम् ।
संन्यायविवृतेर्भावमुद्धरिष्ये यथामति ॥ ९ ॥

आद्याध्यायगते सार्धपूर्वपादद्वयेऽस्ति हि ।
पञ्चिका जयतीर्थीया तस्मात्पक्तं मयात्र तत् ॥ १० ॥

उभयत्र प्रसिद्धनामलिंगात्मकशब्दसमन्वयप्रतिपादनार्थमयं पादः प्रवृत्तः । एतत्पादीयाधिकरणानां सर्वेषामव्याख्यातत्वात् व्याख्यां करोम्यन्वयीति प्रतिज्ञा वन्ध्या स्यादिति पूर्वोत्तरपक्षयुक्तिकथनेनैव सर्वाधिकरणानां व्याख्याततां मन्यमानेन भगवता आचार्येणैतत्पादीयाधिकरणपूर्वोत्तरपक्षन्याया अनुव्याख्यायां संग्रहेणोक्ताः । *

द्युभ्वाद्यायतनं स्वशब्दात् ॥

End :

विष्णुज्ञानवत्स्वज्ञानस्याप्यधिकारिणां पुरुषार्थहेतुत्वात् स्वस्वरूपप्रदर्शनपूर्वकं स्वग्रन्थप्रतिपाद्यमाह । यस्येति । देवताप्रार्थनेन ग्रन्थः समापनीयो न स्वस्तवनेनेत्याशयेनाह ॥ नम इति ॥

प्रेयसां सकाशादिति शेषः । अरणमित्यपि संबोधनं
अरणं भवेति शेषो वा ॥

संपूर्णविज्ञानसुखादियुक्तो
दोषोज्झितः सर्वसुमानमेयः ।
ब्रह्मादिसर्जीवगतिः परेशो
नारायणः प्रीतियुतो मयि स्यात् ॥

Colophon :

इति श्रीमद्रघुवर्यतीर्थपूज्यपादशिष्यरघूत्तमयतिकृते श्रीमज्जय-
तीर्थचरणप्रदर्शिततत्त्वप्रकाशिकागतन्यायविवरणोद्धारे
चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तोऽयं ग्रन्थः ॥
श्रीकृष्णार्पणमस्तु ॥

Subject: Tattvaprakāśikānyāyavivaraṇa. I. 3 to IV. 4.

Remarks:—The Ms. is in a good condion. For remarks see under No. 7839.

॥ तत्त्वप्रकाशिकाव्याख्या—अभिनवचन्द्रिका ॥

7842. TATTVAPRAKĀŚIKĀVYĀKHYĀ-ABHINAVACANDRIKĀ.

Burnell's Catalogue No. 5792. Page 101. Right column. Substance—Paper. Size—12½ × 5 inches. Sheets—358. Lines—18 to 15 to a Page. Script—Devanāgarī. No. of Granthas—12600. Author—Satyanāthayati. Complete. Not printed.

Beginning :

श्री वेदव्यासाय नमः ॥ ॐ ॥

सच्चिदानन्ददेहाय नमः शेषाङ्गशायिने ।
आत्मने वेदवेद्याय मुक्तगम्याय विष्णवे ॥ १ ॥

भवाब्धिर्जानुदघ्नः स्यादानन्दः कण्ठसंमितः ।
मदुपास्त्येति हस्ताभ्यां रामो रक्षतु सूचयन् ॥ २ ॥

विभज्य वेदं यः सूत्रं चक्रे वेदार्थवित्तये ।
प्रार्थितो ब्रह्मरुद्राद्यैर्नमो व्यासाय विष्णवे ॥ ३ ॥

असाधूनां निबन्धेन कुण्ठितं सूत्रमञ्जसा ।
व्याख्यातं येन सर्वज्ञं वन्दे भाष्यकृतं मुनिम् ॥ ४ ॥

भाष्यबोधाय सत्तर्कदीपावलिमचीक्लृपत् ।
स पद्मनाभतीर्थार्यो दद्याद्धियं सतां गुरुः ॥ ५ ॥

श्रीमद्भाष्यं यथाचार्यभावं यैः सुप्रकाशितम् ।
वन्दे तान् जयतीर्थार्यान् यैः सुधा निर्मिता मुदा ॥ ६ ॥

व्यासराजेन्दुमाशासे चन्द्रिका यस्य संमता ।
दुर्वादिचोरान् विद्राव्य रक्षितं भुवनत्रयम् ॥ ७ ॥

अनधीत्य महाभाष्यं व्याख्यातं यदनुग्रहात् ।
वन्दे तं विधिना सत्यनिधिं विज्ञानसिद्धये ॥ ८ ॥

ज्ञानभक्त्याद्युपेतानामाचार्याणामनुस्मृतेः ।
अज्ञस्तरामि दुर्गाणि येभ्योऽलब्धा मया सुधा ॥ ९ ॥

रामचन्द्रप्रसादाभिलब्धा भुवनचन्द्रिका ।
तत्त्वप्रकाशिकाव्याख्या व्यज्यते विदुषां मुदे ॥ १० ॥

अनुवादः पूर्वपक्षसिद्धान्तानां करिष्यते ।
अयोगं बहुवाक्यानामुक्त्वा योगः प्रदर्श्यते ॥ ११ ॥

स्वयं मङ्गलमनुष्ठाय शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति ॥

शुद्धेति ॥

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ ❀ ❀

स्वग्रन्थस्य प्रचयं प्रार्थयते ॥ मध्वेति ॥

सद्यो मोक्षं सदा रामचन्द्राभिनवचन्द्रिका ।
हस्तप्राप्तमिवातेने चतुर्थाध्यायसंगता ॥ १ ॥

नौमि तं यो लैङ्गभङ्गं सूचयन् स्वप्रसादतः ।
बभञ्ज कार्मुकं लैङ्गं रामचन्द्रो रमापतिः ॥ २ ॥

यद्ब्रह्मसेतुना सन्तः संसारं सागरोपमम् ।
तरन्ति सुखिनः पश्चाद्व्यासं तं नौमि संततम् ॥ ३ ॥

दुर्भाष्यकण्टकतरून् छित्वा व्यक्तीचकार यः ।
व्यासं सेतुं सूत्रसंज्ञं भाष्यकारं नतोऽस्मि तम् ॥ ४ ॥

तत्त्वप्रकाशिका साधुकुमुदानन्ददायिनी ।
यदीया कौमुदी वन्दे जयतीर्थनिशाकरम् ॥ ५ ॥

यद्वाक्यमनुधावन्ति संपदः सादरं सदा ।
तमाश्रये सत्यनिधिं ज्ञानभक्त्यादिसिद्धये ॥ ६ ॥

यदि प्रसन्ना गुरवो ब्रह्माद्याः विबुधा हरिः ।
प्रतिगृह्णन्तु कृपया सदाऽभिनवचन्द्रिकाम् ॥ ७ ॥

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथय-
तिविरचितायां तत्त्वप्रकाशिकाऽभिनवचन्द्रिकायां चतुर्थाध्या-
यस्य चतुर्थः पादः ।समाप्तोऽयं ग्रन्थः । चतुर्थाध्यायः संपूर्णः ॥

Subject: Tattvaprakāśikāvyākhyā, Abhinavacandrikā. a commentary on Tattvaprakāśika of Jayatīrtha.

Remarks:—The Ms is in good condition. This is another super-commentary on Jayatīrtha's Tattvaprakāśikā which is not printed. Its author is one Satyanāthayati who calls himself the disciple of Satyanidhitīrtha. This author has also written a commentary on Jayatīrtha's Karmanirṇayaṭīkā, which is not also printed.

॥ तत्त्वप्रकाशिकाव्याख्या—अभिनवचान्द्रिका ॥

7843. TATTVAPRAKĀŚIKĀVYĀKHYĀ—ABHINAVACANDRIKĀ.

Burnell's Catalogue No. 5791. Page Right column.
Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—

511. Lines—10-13 to a Page. Script—Devanāgarī. No. of Granthas—12600. Author—Satyanāthayati. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 7842.

Remarks:—The Ms. is in a good condition.

॥ तत्त्वप्रकाशिकाव्याख्या—तात्पर्यचन्द्रिका ॥

7844. TATTVAPRAKĀŚIKĀVYĀKHYĀ—TĀTPARYACANDRIKĀ.

Burnell's Catalogue No. 5795. Page 101. Right column. Substance—Paper. Size—10×8½ inches. Sheets—94. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—8450. Author—Vyāsatīrtha. Incomplete. Printed.

Beginning:

श्री वेदव्यासाय नमः । श्री गुरुभ्यो नमः ॥

अविघ्नमस्तु ।

अस्पृष्टदोषगन्धाय कल्याणगुणसिन्धवे ।
नमो नमो भक्तमुक्तिदायिने शेषशायिने ॥ १ ॥

शमयन् भवसन्तापं रमयन् साधुचातकान् ।
कृष्णमेघः कृपादृष्टिवृष्ट्या पुष्णातु मामपि ॥ २ ॥

End:

॥ सर्वत्र प्रसिद्धोपदेशात् ॥ * *

अत्र तु विष्णुलिंगमस्ति । न हि गंगायां घोष इत्यत्र

गंगाशब्दस्तीरपर इति गंगायां मत्स्य इत्यत्रापि न तथेति। तत्र प्रवृत्तिनिमित्तस्यानन्याधीनत्वादिना विष्णावेव तेषां मुख्य...... ।

Subject: Tattvaprakāśikāvyākhyā Tātparyacandrikā I. 1.

Remarks :—The Ms. is in good condition. The Ms. ends abruptly in the middle of the 1st Pāda of the I Adhyāya.

This is a famous super-commentary on Jayatīrtha's Brahma Sūtra Bhāṣya This is printed along with its original by Mysore Government in the Oriental Library series in 4 Vols. There is also another edition similar to tho above from Kumbakonam.

TATTVAPRAKĀŚIKĀVYĀKHYĀ—TĀTPARYACANDRIKĀ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7845	B. L.	5734	Paper.	$10\frac{1}{2} \times 4\frac{1}{8}$	125	10-11	Devanāgarī.	Incomplete, wants end.
7846	,,	5793	,,	$8\frac{1}{2} \times 2\frac{7}{8}$	109	7	,,	,,
7847	,,	6046	,,	$8\frac{1}{2} \times 3$	122	7	,,	,,
7848	,,	6593	,,	$9 \times 3\frac{3}{4}$	73 (3-75)	8	,,	,, wants beginning.

॥ तात्पर्यचन्द्रिकाव्याख्या—प्रकाशः ॥

7849. TĀTPARYACANDRIKĀVYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 5801. Page 101. Left column. Substance—Paper. Size—10 × 4¼ inches. Sheets—91. Lines—12 to 16 to a Page. Script—Devanāgarī. No. of Granthas—6200. Author—Keśava. Incomplete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥ श्रीगुरुभ्यो नमः ।

परमगुरुभ्यो नमः । गणेशाय नमः ॥

अविघ्नमस्तु ॥

ॐ । सकलसुगुणपात्रं सर्वदोषैकजैत्रं

सुमतसुगतिदात्रं सुष्ठु सज्ज्ञाननेत्रम् ।

निखिलजनिजनित्रं नित्यदुष्टैकवेत्रं

नवनवसुचरित्रं नौमि लक्ष्मीकलत्रम् ॥ १ ॥

* *

वेदव्यासमतापगापतिवरं श्रीमज्जयप्रोक्तसत्

सर्पाविष्टितमध्वसन्मुनिवरग्रन्थप्रवर्येण यः ।

संलोड्याखिलसन्नयामृतवरं तत्वादिसद्दीपिका-

सत्तात्पर्यसुचन्द्रिकातरुवरं यस्तर्कसत्ताण्डवम् ॥ ५ ॥

निःकाश्याद्भुतखण्डनत्रयमुखव्याख्यानरत्नोच्चयं

दृष्ट्वा कुत्सितयुक्त्यरातिपिहिता श्रीव्यासतीर्थो बुधः ।

स्वोक्तिं रक्षितुमत्र यः प्रतिपदं सम्यग्विशेषाधिको
विद्याधीशगुरुतीर्थसद्गुरुवरः किं नावतीर्णः स हि ॥ ६ ॥

विद्याधीशं चन्द्रिकाब्धिविक्रीडनविचक्षणम् ।
विद्यागुरुं कुलगुरुं नौमि तं मे जगद्गुरुम् ॥ ७ ॥

निशम्य सकलं शास्त्रं विद्याधीशाज्जगद्गुरोः ।
चन्द्रिकायाः प्रकाशोऽयं केशवेन प्रकाश्यते ॥ ८ ॥

ग्रन्थादौ मङ्गलमाचरति ॥ अस्पृष्टेति ॥

End :

नन्वित उत्तरस्य पेटिकाग्रन्थस्य विद्यमानत्वा ....
व्याख्यायात्वेवाधिकरणसमाप्तिरुचितेत्याशङ्का ......व्या-
ख्याने ...परिहरति । शिष्टं सुगममित्यशेषमतिमङ्गलम् ।
श्रीरामो विजयतेतराम् ॥

Subject : Tātparyacandrikāvyākhyā—Prakāśa.

Remarks:—The Ms. is in a decaying condition.

This author is also called Keśava Bhaṭṭāraka. This is a commentary on Vyāsa Tīrtha's Tātparyacandrikā. The author in one of his introductory verses calls this commentary Prakāśa. But in the Mysore Government edition of Tātparyacandrikā Keśava's commentary is published under the name Candrikā Vākyārtha Vivṛti and another commentary of Tātparyacandrikā is printed under the name Candrikā Prakāśa by Rāghavendratīrtha. The same names are also given in the edition published at Kumbakonam. Most probably the

commentary that is herein called Prakāśa is the same as that printed under the name Vākyārthavivṛti.

॥ तात्पर्यचन्द्रिकाव्याख्या—प्रकाशः ॥

7850. TĀTPARYACANDRIKĀVYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 5798 & 99. Page 101. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—53 (116-168). Lines—13-18 to a Page. Script—Devanāgarī. No. of Granthas—3360 Author—Keśava. Incomplete. Wants beginning. Printed.

Beginning:

....षु त्रिषु पक्षयोर्द्वितीययोरिव तृतीयस्याप्याशंक्य निरासः। पूर्वपक्षसिद्धान्तन्यायभेदाद्भेद इति चतुर्थपक्ष-निरासात्...समुचित इति चतुर्थनिरासानन्तरं तस्य समुचित इति भाति ॥

End:

वज्रशब्दस्योभयत्र प्रसिद्धतायास्तदधिकरण एव आक्षेपसमाधानाभ्यां समर्थयिष्यमाणत्वान्न तस्याप्यान्तर्भावशं-केति। एवमाक्षिप्तमन्यत्र प्रसङ्गादिभेदमुपपाद्य यच्छब्दा-योगवृत्तय इति प्रागाक्षिप्तं नामलिंगभेदमप्युपपादयति। नामलिङ्गभेदास्त्विति। आपातत इति। एवशब्दः यौगि-

कत्वयोगरूढत्वव्यावृत्त्यर्थः । रूढान्यायेन नामानीत्युक्ते आकाशादि सर्वना...संभव इति ॥

Colophon: (Page 178).

इतीक्षत्यधिकरणं समाप्तम् ॥

समाप्ता चेयं पञ्चाधिकरणी ॥

गुरुराजो विजयतेतराम् ॥

Subject: Tātparyacandrikāvyākhyā—Prakāśa—I. I.

Remarks:– The Ms. is in good condition. This Ms. deals with only the section of Ānandamayādhikaraṇa. On the back side of the last sheet is given गुरुराजा and केशव ।

॥ तात्पर्यचन्द्रिकाव्याख्या—प्रकाशः ॥

7851. TĀTPARYACANDRIKĀVYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 5800. Page 101. Right column. Substance—Paper. Size—18⅜ × 5⅜ inches. Sheets—61. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Keśava. Incomplete; Wants end. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

समस्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
ज्ञानिप्रियतमं वन्दे मुक्तिदं कमलापतिम् ॥ १ ॥

शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः ।
पूर्णप्रज्ञपदाम्भोजपांसवः पान्तु नः सदा ॥ २ ॥

विधूतदुर्मदध्वान्तो विशदीकृतपद्धतिः ।
यः सज्जनान्...जहार जयतीर्थरविं भजे ॥ ३ ॥

पदवाक्यप्रमाणज्ञान् संप्रदायार्थकोविदान् ।
व्यासतीर्थमुनीन् सेवे दुर्वादिफणिपक्षिपान् ॥ ४ ॥

अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम् ।
तात्पर्यचन्द्रिकाव्याख्यां विधास्यामि यथामति ॥ ५ ॥

तत्त्वप्रकाशिकाव्याख्याव्याजेनाधिसूत्रं प्रवर्तमानेषु ग्रन्थेषु दुर्गमानर्थान् सुगमान् विधित्सुर्व्यासतीर्थमुनिः प्रारीप्सितग्रन्थपरिसमाप्त्याद्यर्थमध्यायचतुष्टयोक्तगुणविशिष्टदेवतानतिरूपं मङ्गलं विदधाति ॥ अस्पृष्टेति ॥

End:

ईक्षत्यधिकरण इति । ध्येयं गुणार्णवमित्युक्त्या सगुणत्वादिविप्रतिपत्तिः वासुदेवमित्युक्त्या शिवत्वादिविप्रतिपत्तिः सूचिता । एवं पादान्तरैरपि द्रष्टव्यम् । दुर्गमानि कानिचिद्वाक्यानि व्यनक्ति । टीका शेषाक्षरार्थस्त्विति व्याख्यातावशिष्टा शेषेत्यर्थः । शेषाक्षरार्थ इति वा नामनीति विश्वेत्यस्यानुवादः सर्वाणीति ॥

Subject: Tātparyacandrikāvyākhyā—Prakāśa—I. I.

Remarks:—The Ms. is in good condition. The introductory verses are different from those in No. 7849.

॥ तात्पर्यचन्द्रिकान्यायविवरणम् ॥

7852. TĀTPARYACANDRIKĀNYĀYA-VIVARAṆAM.

Burnell's Catalogue No. 6802. Page 101. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—35. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Timmaṇṇācārya. Incomplete. Not printed.

Beginning:

श्री हयग्रीवो जयति ॥

सर्वाभीष्टप्रदं वीरं सर्वविघ्नौघनाशनम् ।
नरसिंहं सद्गुणाढ्यं प्रणमामि सुसंविदे ॥ १ ॥

ये न्यायाः पूर्वतन्त्रीयाश्चन्द्रिकायामुदाहृताः ।
सुखेन प्रतिपत्त्यर्थं मततन्त्रविदामपि ॥ २ ॥

विद्याधीशगुरुं नत्वा तत्प्रसादैर्युतः सदा ।
तदुक्तेनैव मार्गेण तान् सर्वान् विवृणोम्यहम् ॥ ३ ॥

प्रमाणलक्षणे तर्कलक्षणे प्रथमाधिकरणे चिन्तितम् ।
अथातो ब्रह्मजिज्ञासा चोदनालक्षणोऽर्थो धर्म इत्यार-
भ्याम्नाहार्यदर्शनादित्यन्तं शास्त्रमस्य विषयः ।

End:

क्रियमाणदशायामेव साक्षात्परंपरया वाऽहारभेदेन सर्व-
स्य कारणतात्वाविशेषा......तु ततो हेतुसमर्पकतया
नार्थवादानामन्वय इति न हेतुसापेक्षत्वेन चोदनानाम-
प्रमाणमिति...... ।

Subject: Tātparyacandrikānyāyavivaraṇa an exposition of the various Nyāyas that are used in Tātparya-candrikā in proving the dualistic siddhānta.

Remarks:—The Ms. is in a fairly good condition. This author is a great Naiyāyika and is the author of many works and tracts on dualism, some of which are contained in this library.

॥ तात्पर्यचन्द्रिकाव्याख्या ॥

7853. TĀTPARYACANDRIKĀVYĀKHYĀ.

J. L. Collection No. 991.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—150. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4860. Author—? Incomplete. Not printed.

Beginning:

...क ब्रह्मसत्त्वे मानाभावादिति भावः । निर्विषयत्व-
मिति न हिमस्फीतालोकमध्यमध्यासीनं कश्चित् जिज्ञासत
इति भावः । न विवक्षितार्थत्वं वेदान्तानामाशङ्कितुं श-

कथं। * * नि-

र्णीतत्वादित्यत आह — अध्ययनेत्यादि ।

* *

(Sheet No. 70)

जन्माद्यस्य यतः ॥

End: (Sheet 321)

अन्तर उपपत्तेः ।

* *

तत्रास्वारस्यमाह किञ्चेति । इति सूत्र इति ॥

सूत्रव्यक्तीकरणा(?) इत्यर्थः कथं साक्षाद्ब्रह्मविषयत्वमित्य... ।

Colophon: Nil.

Subject: Tātparyacandrikāvyākhyā.

Remarks :—The Ms. is in good condition. Alternate sheets are sulphurated. The author's name could not be traced.

॥ तात्पर्यचन्द्रिकोदाहृतन्यायविवरणम् ॥

7854. TĀTPARYACANDRIKODĀHṚTA-NYĀYAVIVARAṆAM.

Burnell's Catalogue No. 5803. Page 101. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—97. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Vijayīndra. Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

विनताशेषहृदयजनितानन्दवैभवः ।
प्रह्लादवरदो भूयात्प्रह्लादाय सदा मम ॥

ये न्यायाः पूर्वतन्त्रीयाश्चन्द्रिकायामुदाहृताः ।
गुरुपादैः क्रमात्तेषां विषयाद्यङ्गपूर्वकम् ॥

शरीरं विजयीन्द्राख्यभिक्षुणेह प्रदर्श्यते ॥
सुखेन प्रतिपत्त्यर्थं मततन्त्रविदामपि ॥

सिद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वं च वायुर्वै क्षे-
पिष्ठादिवाक्यवद्विद्वाक्यवच्च न्यायप्राप्तत्वाच्च सद्यमिति ॥
* "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां त-
स्मादनित्यमुच्यते" इत्यधिकरणे ॥

End:

तदुक्तं शाबरभाष्ये किं हि कवनं न कुर्याद्वर्णसङ्ख्यासा-
मान्यमात्रेण गौणम् । तथाप्येकत्र ऋत्विजः प्रचरन्तीतीत्या-
दाविव न्यायमुल्लंघ्यादिवचनं प्रवर्तत इत्यर्थः ।

Colophon:

सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
चन्द्रिकोदाहृतन्याया विवृता बालसंविदे ॥

इति चन्द्रिकोदाहृतन्यायविवरणं विजयीन्द्रभिक्षुविर-
चितं समाप्तम् ॥

Subject: Tātparyacandrikodāhṛtanyāyavivaraṇa. I. 1–4.

Remarks:—The Ms. is in good condition. This is a famous Dvaita author. Many of his works are not printed including this present one. This is a work similar to that of Timmaṇṇācārya elucidating the logical exposition of Dvaita. This author is one of the Madhva Ācāryas. Sudhīndra was his successor, and Surendra was his predecessor. He was honoured with Ratnābhiṣeka by Emperor Rāmarāya of Vijayanagar. So he may be assigned to the 16th century.

॥ ब्रह्मसूत्रव्याख्या—तन्त्रदीपिका ॥

7855. BRAHMASŪTRAVYĀKHYĀ—TANTRADĪPIKĀ.

Burnell's Catalogue No. 5758. Page 101. Right column. Substance—Paper. Size—11½ × 4 inches. Sheets—28. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Rāghavendra. Incomplete. Printed.

Beginning:

श्रीगुरुभ्यो नमः ॥ ॐ ॥

प्रणम्य गुणसंपूर्णं दोषातीतं रमापतिम् ।
पूर्णबोधं गुरूनन्यान् कुर्मः सूत्रार्थसङ्ग्रहम् ॥ १ ॥

ब्रह्मरुद्रादिभिर्ज्ञानार्थमर्थितो नारायणो व्यासत्वेनावतीर्य उत्सन्नान्वेदानभिव्यक्तिपूर्वमनेकधा विभजते । तदर्थनिर्णयाय ब्रह्मसूत्राणि व्यातेने । तत्रेदमादिसूत्रम् । ॐ ।

अथातो ब्रह्मजिज्ञासा ॥

End:

ननु ब्रह्म तदन्ययोर्मुमुक्षुज्ञेयत्वोक्त्यनुक्तिभ्यां महार्थवेदानां ब्रह्मपरत्वासिद्ध्यै चेति वाच्यम्। तत्परत्वस्यादावन्ते मध्ये चेत्यादिना सिद्धेः स्वतः। प्राप्तमुख्यवृत्तित्यागायोगाद्व्यक्तादिमुख्यार्थौ ब्रह्मेत्यर्थः॥ उक्तमाक्षिप्य..........।

Subject. Brahmasūtravyākhyā—Tantradīpikā. I Adhyāyā.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the beginning of the 4th pāda of the I Adhyāya.

This commentary is by Rāghavendratīrtha a disciple of Sudhīndra who was a contemporary of Raghunātha Nāyak the third Nāyak ruler of Tanjore who flourished in the latter part of 16th and former part of the 17th century. This work is published with a gloss at Balgaum and Bombay in 1910. There is a poem called Rāghavendra Vijaya in which the poet Nārāyaṇa describes the life of this author and his various religious fights in which he came out victorious. He was a contemporary of Emperor Veṅkaṭapatirāya of Vijayanagar and Raghunātha Nāyak of Tanjore. So he may be assigned to the latter part of 16th and early part of the 17th centuries. The Guruparampara may thus be given as far as this author is concerned.

Surendra
|
Vijayīndra
|
Sudhīndra
|
Rāghavendra

॥ अनुव्याख्यानम् ॥

7856. ANUVYĀKHYĀNAM.

Burnell's Catalogue No. 6809 Page 102. Left column. Substance—Paper. Size—8 × 3⅞ inches. Sheets—48. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेङ्कटेशाय नमः ॥

नारायणं निखिलपूर्णगुणैकदेहं
निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोऽपि
वन्द्यं सदा प्रियतमं मम संनमामि ॥ १ ॥

End:

निःशेषदोषरहितकल्याणाखिलसद्गुण ।
भूतिस्वयंभुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्कृष्णद्वैपायनकृतब्र-
ह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः समाप्तिं प्रापच्च
ग्रन्थश्च समाप्तः ।

श्रीरस्तु ॥

अनुव्याख्याऽसंख्यामलगुणगणाद्यामरपतेः
परिव्याख्यालेख्याश्रितजनमतार्थामरतरोः ।

श्रुतिव्याख्याप्रख्याजजनकसूत्रार्थविवृतिः

क्षमाविख्याताख्यालुलितयशसः शेषविदुषा ॥ १ ॥

विभवाब्देऽश्विने मासि प्रथमायां सिते विधौ ।

शेषनामा हरेस्तुष्ट्या अनुव्याख्यां समालिखत् ॥

श्रीनिखिलरूपी श्रीवैकुण्ठेशः प्रीयताम् ॥

Subject: Anuvyākhyā.

Remarks:—The Ms. is in good condition. This is a work by Ānandatīrtha being a commentary on the Brahmasūtras in verse. This is published in Sarvamūlam Series edited by T. R. Krişnācārya. The name of the scribe is one Śeṣa.

ANUVYĀKHYĀNAM.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7857	B. L.	5314	Paper.	$11\frac{1}{2}\times4\frac{7}{8}$	66	11	Devanāgarī.	Complete.
7858	,,	5818	,,	$8\frac{1}{2}\times3\frac{3}{8}$	97	8-11	,,	,,
7859	,,	6204	,,	$7\frac{1}{3}\times2$	208	5 or 6	,,	,,
7860	,,	6106	,,	$10\frac{1}{3}\times8\frac{3}{4}$	8	9	,,	Incomplete.

DETAILED REMARKS
on the
ANUVYĀKHYĀNA MSS.

7859

इति चतुर्थः पादः ॥

इदमनुव्याख्यानमलङ्कारवेदव्यासेन लिखितम् ॥ नलसंवत्सरमार्ग-
शीर्षबहुल अमावास्यायां समाप्तम् ॥

श्रीकृष्णः प्रीयताम्

॥ अनुव्याख्यानव्याख्या—न्यायसुधा ॥

7861. ANUVYĀKHYĀNAVYĀKHYĀ—NYĀYASUDHĀ.

Burnell's Catalogue No. 5804. Page 102. Left column. Substance—Paper. Size—12⅞ × 5 inches. Sheets—585. Lines—10-13 to a Page. Script—Devanāgarī. No. of Granthas—23600. Author—Jayatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ अविघ्नमस्तु ॥

श्रियःपत्यै नित्यागणितगुणमाणिक्यविशद
प्रभाजालोल्लासोपहतसकलावद्यतमसे ।
जगज्जन्मस्थेमप्रलयचवना(?)शीलवपुषे
नमोऽशेषाम्नायस्मृतिहृदयदीपाय हरये ॥ १ ॥

End:

भगवन्तं संबोध्य स्तौति । निश्शेषेति ॥ भूतिर्महाल-
क्ष्मीः ॥

Colophon:

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
ध्रियतां हृदये सदये कमलामहिलेन पुरुषेण ॥

न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया
न मात्सर्यावेशान्न च चपलतादोषवशतः ।
परं श्रद्धाजाड्यादकृषि कृतिमाचार्यवचसि
स्खलन्नप्येतस्माज्जगति न हि निन्द्योऽस्मि विदुषाम् ॥

अनुव्याख्यामृताम्बोधेः समुत्पन्नातिनिर्मला ।
इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥ श्री ॥

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
चतुर्थेऽध्यायेऽस्मिन् चरमचरणः पर्यवसितः ॥

इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

Subject: Anuvyākhyānavyākhyā—Nyāyasudhā.
I. 1. to IV. 4.

Remarks:—The Ms. is in good condition. Jayatīrtha is a prolific commentator on Ānandatīrtha's works. This is a commentary on Ānandatīrtha's Anuvyākhyāna. This is printed at Bombay in 1897 edited by T. R. Kriṣṇācārya and others.

ANUVYĀKHYĀNAVYĀKHYĀ—NYĀYASUDHĀ.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7862	B. L. 5817	Paper.	$10\frac{3}{4} \times 4\frac{1}{3}$	503	9-14	Devanāgarī.	I. 1 to II. 4
7863	„ 5818	„	$11\frac{1}{2} \times 3\frac{3}{4}$	197	8-12	„	I. 1—4
7864	„ 5821	„	$18\frac{3}{4} \times 5\frac{1}{2}$	206	13 or 14	„	I. 1—4
7865	„ 5819	„	$9\frac{1}{2} \times 3\frac{7}{8}$	158	7-11	„	I. 1—4
7866	„ 5823	„	11×4	27	11-14	„	II. 1—4
7867	„ 5820	„	$9\frac{1}{2} \times 4$	171	9-12	„	I. 1.
7868	„ 5824	„	$11\frac{1}{2} \times 4$	104	7-9	„	II. 1—2
7869	„ 5822	„	$9\frac{1}{2} \times 4$	35	9-11	„	II. 1
7870	„ 5825	„	$11\frac{2}{3} \times 4$	55	9	„	IV. 1-4.

॥ न्यायसुधाटिप्पणी ॥

7871. NYĀYASUDHĀṬIPPAṆĪ.

Burnell's Catalogue No. 5826. Page 102. Right column.
Substance—Paper. Size—10 × 8½ inches. Sheets—26. Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Yadupati. Incomplete. Beginning only. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादार्येभ्यो नमः ॥ हरिः ॐ ॥

सुखमुखगुणबिम्बः साधुमार्गावलम्बः
सुमतिजलजमोदो दूषितान्यप्रमोदः ।
भुवनविततमोहध्वान्तविध्वंसकेहो
दिशतु दशमभीष्टां व्याससूर्यः स्वनिष्ठाम् ॥ १ ॥

पूर्णप्रज्ञजयार्यपूर्वकगुरूनानम्य विद्याप्रदान्
वेदेशाभिधयोगिनोऽपि कृपया तेषां सुधाटिप्पणीम् ।
बालानां तनुतेऽमितां यदुपतिर्बोधाय धीशुद्धये
स्वस्यापि प्रविचिन्त्य सद्गुरुमुखान् सम्यक् श्रुतार्थान् मुहुः ॥

न पाण्डित्याभिमानेन नापि मत्सरतः क्वचित् ।
यत्नोऽयं किन्तु धीवाचोविशुद्ध्यै मम नान्यथा ॥ २ ॥

अथ परमकारुणिको जयतीर्थश्रीचरणः,

ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् ।
बहुशा एव जानन्ति विशेषेणार्थमेतयोः ॥ इति

आचार्योक्तौ लोकानां विश्वासमुपजनयन् अनुव्याख्यानव्याख्यामारभमाणोऽभीष्टसमाप्त्यादिप्रयोजनकं श्रीपतिस्तुतिप्रणामरूपं मंगलं ग्रन्थादौ शिष्यशिक्षायै तदुपनिबध्नाति ॥ श्रियः पत्य इति ॥

End:

प्रयोजनाद्यनिश्चयेऽप्युक्तरीत्या तयोः संभवान्न कोऽपि दोष इति भावः । अनुभवस्य प्रयोज...... ।

Subject: Nyāyasudhāṭippaṇi, a gloss upon Nyāyasudha a supercommentary on Ānandatīrtha's Anuvyākhyāna

Remarks:– The Ms. is in a decaying condition. This author is also the author of a commentary on Jayatīrtha's Tattvasaṅkhyānavivaraṇa.

॥ अनुव्याख्यान्यायविवरणम् ॥

7872. ANUVYĀKHYĀNYĀYAVIVARAṆAM.

Burnell's Catalogue No. 5810. Page 102. Right column. Substance—Paper. Size—11½ × 4¼ inches. Sheets—17. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Ānandatīrtha Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः । श्रीगुरुभ्यो नमः ॥
श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

श्रीरामचन्द्राय नमः । हरिः ॐ ॥

चेतनाचेतनजगन्नियन्त्रेऽशेषसंविदे ।
नमो नारायणायाजशंभुशक्रादिवन्दित ॥

कृत्वा भाष्यानुभाष्येहमपि वेदार्थसत्पतेः ।
कृष्णस्य सूत्रानुव्याख्यासंन्यायविवृतिः स्फुटम् ॥

करोमि मन्दबुद्धीनां बुधानाञ्चोपकारिकाम् ।
प्रीत्यै तस्यैव देवस्य तत्प्रसादपुरःसरः ॥

End:

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
षट्तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् ।
वायोरामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

नमोऽजभवभूर्यक्षपुरःसरपुराश्रय ।
नारायणारणं मह्यं मां पते प्रेयसां प्रियः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्या-
ख्यानन्यायविवरणे चतुर्थोऽध्यायः ।

इति चतुर्थाध्यायः समाप्तः ।

यादृशं + न विद्यते ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः ॥

Subject: Anuvyākhyānyāyavivaraṇa.

Remarks:—The Ms. is in good condition.

This is a work on the logical bases of Madhva Philosophy as expounded in Anuvyākhyāna by Ānandatīrtha himself. This is published with a commentary by Raghūttamayati called Bhāvabodha at Udpi in 1917. This author is also the author of a commentary on Tattvaprakāśika of Jayatīrtha which also he calls by the name Bhāvabodha. For further remarks see under No. 7889.

॥ अनुव्याख्यान्यायविवरणम् ॥

7873. ANUVYĀKHYĀNYĀYAVIVARAṆAM.

Burnell's Catalogue No. 5811. Page 102. Right column. Substance—Paper. Size—8 × 8½ inches. Sheets—12. Lines—15-18 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7872.

Remarks:—The Ms. is in a good condition.

॥ अनुव्याख्यान्यायविवरणम् ॥

7874. ANUVYĀKHYĀNYĀYAVIVARAṆAM.

Burnell's Catalogue No. 6224. Page 110. Right column. Substance—Paper. Size—7⅝ × 2 inches. Sheets—58. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—540. Author—Ānandatirtha. Complete. Printed.

Beginning, end and subject—Same as No. 7872.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्न्यायविवरणे चतुर्था-
ध्यायस्य चतुर्थः पादः ॥ श्रीकृष्ण ॥

श्रीमत्कालयुक्तनामसंवत्सरकार्तिकशुद्धपौर्णमास्यां सौम्यवासरे न्याय-
विवरणं समाप्तम् ॥

Remarks:—The Ms. is in good condition.

॥ अनुव्याख्यान्यायविवरणव्याख्या—पञ्चिका ॥

7875. ANUVYĀKHYĀNYĀYAVIVARAṆA-VYĀKHYĀ—PAÑCIKĀ.

Burnell's Catalogue No. 5805. Page 101. Right column. Substance—Paper. Size—12×8½ inches. Sheets—24. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—460. Author—Raghūttamayati. Incomplete. Printed.

Beginning:

श्री वेदव्यासाय नमः ।

जयन्ति जानकीभर्तुश्चरणाम्भोजरेणवः ।
नमत्सुरकिरीटस्थान्ये मणीनतिशेरते ॥ १ ॥

दुरन्तदुरितध्वान्तविध्वंसनपटीयसे ।
बादरायणसंज्ञाय परस्मै महसे नमः ॥ २ ॥

नमामि श्रीमदानन्दतीर्थाचार्यपरं गुरुम् ।
यस्य वाणीकृपाणीयं निष्कृन्तति भवाटवीम् ॥ ३ ॥

End:

तानीदानीं विवृण्वंस्तावद्ब्राहुल्यं लिङ्गशब्दानामिति प्रथमाधिकरणपूर्वपक्षन्यायं विवृणोति । यास्मिन् यौ-रिति ॥ श्रीः ।

Subject: Anuvyākhyānyāyavivaraṇavyākhyā—Pañcikā I. 1 to 3.

Remarks: —The Ms is in good condition. This commentary of Nyāyavivaraṇa is printed under the name Bhāvabodha along with the text of Ānandatīrtha at Udipi. He is also called Raghūttamatīrtha. For further remarks see under No. 7839.

Dr. Burnell mistakes this for this author's commentary on Jayatīrtha's Tattvaprakāśikā noticed under No. 7841.

॥ अनुव्याख्यान्यायविवरणव्याख्या—पञ्चिका ॥

7876. ANUVYĀKHYĀNYĀYAVIVARAṆA-VYĀKHYĀ—PAÑCIKĀ.

Burnell's Catalogue No. 5812. Page 102. Right column. Substance—Paper. Size—$9\frac{3}{4} \times 8\frac{7}{8}$ inches. Sheets—12. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Raghūttamayati. Complete Printed.

Beginning—Same as No. 7875.

End:

तत्सर्वथा कथं नु केनोपायेन जीवाभ्यहमिति प्रतीय-
मानामानुकूल्येन ग्रहण.... इति संबन्धः । विचारप्रकार-
प्रदर्शनं करयेति । विचार्यमिति ॥

Subject: Anuvyākhyānyāyavivaraṇa Pañcikā, I. 1—8

Remarks:—The Ms. is in good condition. The name of the work on the title page is given as:—

" श्रीन्यायविवरणटीकाजयतीर्थीया "

This had led Dr. Buruell to the confusion that this is a work of Jayatīrtha and he accordingly states in his catalogue. But it is the same as treated in the above number.

॥ अनुव्याख्यान्यायसंबन्धदीपिका ॥

7877. ANUVYĀKHYĀNYĀYASAMBANDHA-DĪPIKĀ.

Burnell's Catalogue No. 5806. Page 102. Right column. Substance—Paper. Size—$10\frac{1}{2}\times4\frac{1}{2}$ inches. Sheets—12. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—460. Author—Śaṅkara. Complete. Not printed.

Beginning:

श्रीरामचन्द्रवेदव्यासाय नमः ॥ श्रीनृसिंहाय नमः ।

स्वभक्तमानसाजन्मनिकरोन्मेषहेतवे ।
विद्यांशुभिन्नतमसे नमोऽस्तु व्यासभानवे ॥ १ ॥

व्याख्यादिकं कृतं येन करुणोद्भावितात्मना ।

ब्रह्मादैः पूर्णबोधाय तस्मै श्रीगुरवे नमः॥ २ ॥

संबन्धो युक्तिमालादेर्भाष्याधिकरणैस्तु यः ।

हिताय मन्दबुद्धीनामस्माभिः संप्रकाश्यते ॥ ३ ॥

॥ ॐ ॥ अथातो ब्रह्मजिज्ञासा ॥ अभेदः । भेदः । जन्माद्यस्य यतः । जीवब्राह्मित्वम् । लक्षणभेदः । शास्त्रयोनित्वात् । लक्षणसाम्यम् । शास्त्रयोनित्वम् । तत्तु समन्वयात् ॥

End:

दृष्टनिर्णययुक्तिर्यदिष्यते बह्वनुग्रहः ।

तेनैव च पुमर्थाप्तिर्नृणां तत्त्वावगाहिनाम् ॥

उपलक्षणयुक्तेश्च चकारेण समुत्थितेः ।

बहुशो युक्तिमालायां संन्यायविवृतौ पुनः ॥

युक्त्यन्तरस्याप्युक्तेश्च विज्ञापयति स प्रभुः ।

मिथ्याज्ञानतमोभानुर्विद्वज्जनशिखामणिः ॥

गुणरत्नाम्बुधिर्देवो मनःकुमुदचन्द्रमाः ।

सतां विज्ञानदानायावतीर्णो मारुतिः स्वयम् ॥

नमो तमश्चिदानन्दपूर्वपूर्णगुणात्मने ।

ब्रह्मादिभिः सदाध्यातपादपद्माय विष्णवे ॥

नमोऽस्तु भाष्यकाराय तस्मै भगवते सदा ।

आनन्दतीर्थसत्त्वज्ञाय सतामानन्ददायिने ॥

आनन्दतीर्थभगवच्छिष्येण हि कृताकृतिः ।
शङ्करेण हरिप्रीत्यै नाम्ना संबन्धदीपिका ॥

Colophon :

इति श्रीब्रह्मसूत्रानुव्याख्याननयविवरणे संबन्धदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

समाप्तेऽयं संबन्धदीपिका ॥ श्रीकृष्णार्पणमस्तु ॥

Subject : Brahmasūtrānuvyākhyānanyāyavivaraṇasambandhadīpikā.

Remarks:—The Ms. is in good condition. The author of this work is said to be Śaṅkara. Nothing more is known about him.

॥ अनुव्याख्यान्यायसंबन्धदीपिका ॥

7878. ANUVYĀKHYĀNYĀYASAMBANDHA-DĪPIKĀ.

Burnell's Catalogue No. 5807. Page 102. Left column. Substance—Paper. Size—12×3½ inches. Leaves—21. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkara. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7877.

Remarks:—The Ms. is in good condition.

॥ महाभारततात्पर्यनिर्णयः ॥

7879. MAHĀBHĀRATATĀTPARYANIRṆAYAḤ.

Burnell's Catalogue No. 6237. Page 103. Right column.

Substance—Paper. Size—8½ × 3½ inches. Sheets—82. Lines—20 to 22 to a Page. Script—Devanāgarī. No. of Granthas—5320. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्रीगुरुभ्यो नमः ॥ वेदव्यासाय नमः ॥

निर्विघ्नमस्तु ॥

ॐ ॥ नारायणाय परिपूर्णगुणार्णवाय
विश्वोदयस्थितिलयोन्नियतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःख-
सत्कारणाय विततय नमो नमस्ते ॥ १ ॥

End:

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शनमित्थमेव [मेत्र] निहितं देवस्य भर्गो महान् ।
वायोरामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ ७ ॥

ॐ ॥ यः सर्वगुणसंपूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥

Colphon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारत-
तात्पर्यनिर्णये पाण्डवस्वर्गारोहणं नाम द्वात्रिंशोऽध्यायः ॥

श्री हनुमद्भीममध्वान्तर्गतश्रीरामकृष्णवेदव्यासार्पणमस्तु ॥

रुक्मिणीसत्यभामासमेतश्रीमदनगोपालार्पणमस्तु ॥

ॐ नमो(मः) श्रीसीतालक्ष्मणभरतशत्रुघ्न श्रीहनुमत्समेतश्रीरामचन्द्रार्प-
णमस्तु ॥

श्रीरस्तु ॥ श्रीकृष्णार्पणमस्तु ॥

Subject: Mahābhāratatātparyanirṇaya 1-32 Adhyāyas, a work explaining the theological significance of Mahābhārata.

Remarks:—The Ms. is in a fairly good condition. This work is printed at Bombay in 1911 edited by T. R. Kṛṣṇācārya.

MAHĀBHĀRATATĀTPARYANIRṆAYAḤ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7880	B. L. 6031	Paper.	$9\frac{3}{4} \times 4\frac{1}{2}$	221	13 or 14	Devanāgarī.	Complete.
7881	„ 6032	„	$8\frac{1}{2} \times 4\frac{1}{2}$	356	11 or 12	„	„
7882	„ 6195	„	$8\frac{1}{2} \times 3\frac{1}{4}$	21	8–10	„	I-III Adhyāyas.
7883	„ 6187	„	$10\frac{1}{2} \times 3\frac{3}{4}$	20	10	„	Do.
7884	„ 6186	„	$9\frac{3}{4} \times 4$	26	8	„	Do.
7885	„ 6029	„	$10\frac{1}{4} \times 4\frac{1}{8}$	295	8 or 9	„	Do.
7886	„ 6030	„	$8\frac{1}{2} \times 4$	221	8–10	„	IV-XIII.
7887	„ 6036	„	$9\frac{1}{2} \times 4\frac{1}{2}$	56 (23–78)	10	„	IV-XI.
7888	„ 6194	„	$9\frac{1}{2} \times 3\frac{1}{2}$	19	11	„	IV-VIII.
7889	„ 6189	„	$10 \times 4\frac{1}{8}$	14	8 or 9	„	IV & V.
7890	„ 6188	„	$10\frac{1}{2} \times 4$	6	7 or 8	„	IV.
7891	„ 6190	„	$10\frac{1}{2} \times 4$	35	7	„	V-VIII.

7892	,,	6193	,,	$9\frac{1}{2} \times 4\frac{1}{4}$	25 (36-60)	7-10	,,	VI-VIII.
7893	Ms. No	14828	,,	$10\frac{1}{2} \times 4\frac{1}{8}$	9 (15-28)	7 or 8	,,	VI-VII.
7894	,,	14827	,,	$9\frac{4}{5} \times 4\frac{1}{4}$	4	8 or 9	,,	VI
7895	B. L.	6191	,,	$10\frac{1}{2} \times 4$	36	8	,,	IX-XI.
7896	,,	6192	,,	$10\frac{1}{4} \times 4$	18 (9-26)	8-10	,,	XI.

॥ महाभारततात्पर्यनिर्णयव्याख्या—पदार्थदीपिका ॥

7897. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ—PADĀRTHADĪPIKĀ.

Burnell's Catalogue No. 6085. Page 104. Left column.

Substance—Paper. Size—14½ × 6⅝ inches. Sheets—15. Lines—18 to 21 to a Page. Script—Devanāgarī. No. of Granthas—1025. Author—? Incomplete. Not Printed.

Beginning:

॥ मूलम् ॥

यदा रामादवाप्तानि दिव्यास्त्राणि प्रपेदिरे ।
द्रोणात्कुमारास्तेष्वासीत्सर्वेष्वप्यधिकोऽर्जुनः ॥

॥ व्याख्या ॥

श्रीवेङ्कटेशप्रसन्न ॥ यदेति ॥ रामात् परशुरामात् अवाप्तानि प्राप्तानि द्रोणेनेति विशेषः ॥ १ ॥

End:

॥ मूलम् ॥

द्वार्येव तत्प्रतिनिधाय पुरः स भीमः
स्नात्वा जगाम निजसोदरपार्श्वमेव ।
श्रुत्वास्य कर्म परमं तुतुषुः समेताः
मात्रा च ते तदनुभीतियुताः पुरस्थाः ॥ ९३ ॥

॥ व्याख्या ॥

पुरः पुर्याः द्वार्येव द्वारे पार्श्वं समीपं भीतियुताः ते भ्रातरः धर्मादयः तदनु भीमस्यागमनानन्तरं अस्य परमं

कर्म श्रुत्वा मात्रा समेताः तुतुषुः । पुरस्था इत्यस्योत्तर-
श्लोकेनान्वयः ॥ १३ ॥

श्री वेङ्कटेशः प्रसन्नः । श्रीसुगन्धीशाय नमः
श्रीरस्तु ॥

Colophon: (Sheet No. 9)

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारत-
तात्पर्यनिर्णयेऽष्टादशोऽध्यायः ॥

Colophon: (Sheet No. 9.)

इति श्रीमन्महाभारततात्पर्यनिर्णयस्य पदार्थदीपिकायां
अष्टादशोऽध्यायः ॥

Subject: Bhāratatātparyanirṇayavyākhyā—Padārthadīpikā.
XVIII and XIX Adhyayas with the text.

Remarks:—The Ms. is in a fairly good condition.
The name of the author could not be identified.

॥ महाभारततात्पर्यनिर्णयव्याख्या—
दुर्घटार्थप्रकाशिका ॥

7898. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ—DURGHAṬĀRTHAPRAKĀŚIKĀ.

Burnell's Catalogue No. 6196. Page 104. Left column.
Substance—Paper. Size—10 × $4\frac{1}{5}$ inches. Sheets—135.
Lines—11 to a Page. Script—Devanāgarī. No. of Gran-

thas—8220. Author—Satyābhinavayatiḥ. Complete. Not printed.

Beginning:

श्री गुरुभ्यो नमः ॥

नत्वा नारायणं रामं जानकीपतिमच्युतम् ।
पूर्णबोधं शिवगुरुं जयतीर्थगुरुं तथा ॥

पितृमातृभ्रातृरूपान् सत्यनाथगुरूनपि ।
तात्पर्यनिर्णयव्याख्यां करिष्यामि यथामति ॥

श्रीमन्महाभारततात्पर्यनिर्णये प्रथमेऽध्याये—

आसीदुदारगुणवारिधिरप्रमेयो
नारायणः परतमः परमात्स एकः ।
संशान्तसंविदखिलं जठरे निधाय
लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे ॥

इति श्लोके संशान्तसंविदित्यस्य पूर्णसुखयथार्थज्ञानरूप इत्यर्थः । एतेन भगवद्ज्ञानस्य नित्यत्वात् निवृत्तेरभावेन निवृत्तिकथनस्यैवायोगात् संशान्तेति । भगवद्ज्ञानस्य सम्यङ्निवृत्तिकथनं सुतरामयुक्तमिति दूषणं परास्तम् । शान्तिशब्दवत् शान्तशब्दस्यापि सुखवाचित्वात् संशान्तशब्देन भगवतः पूर्णसुखरूपत्वमेवोच्यते । न तु भगवद्ज्ञानस्य सम्यङ्निवृत्तत्वमित्यभ्युपगमात् ॥

End:

॥ तत्रैव ॥

इत्याद्यनन्तानि हरेरुदार-
कर्माणि रूपाणि च तद्गुणाश्च ।
नित्यव्यपेताखिलदोषकस्य
ब्रह्मेत्यनन्तेति च नाम येन ॥

इति श्लोके यतो भगवाननन्तकर्मवाननन्तरूपवान् अनन्त-
गुणवत्त्वलाभेऽपि अनन्तकर्मवत्त्वानन्तरूपवत्त्वालाभादिति
चेन्न । ब्रह्मेत्यत्र गुणैरित्यस्य योग्यतया संबन्धवत् कर्म-
भिरिभि... योग्यतया संबन्धेन कर्मापरिच्छिन्नत्वस्य रू-
पापरिच्छिन्नत्वस्य चोक्त्या अनन्तकर्मवत्त्वानन्तरूपवत्त्व-
योरपि लाभात् ॥ १५३ ॥

Colophon:

रामव्यासावहं वन्दे संपूर्णाशेषसद्गुणौ ।
सीतया सहितौ स्वामिहृद्व्याब्जनिवासिनौ ॥ १ ॥

तात्पर्यनिर्णयग्रन्थकर्तारं नौमि सर्वदा ।
श्रीमध्वदेवं सर्वज्ञगुरुराजहृदब्जगम् ॥ २ ॥

यत्वादिपीठपूजाप्तपुण्यांशेन कृता मया ।
तात्पर्यनिर्णयव्याख्यातॄन् सेवे ज्ञानवारिधीन् ॥ ३ ॥

सत्यनाथगुरून्नित्यं सर्वाभीष्टप्रदायकान् ।
तत्स्मृतिः सन्ततं भूयात्संसृतिव्याधिनाशिनी ॥ ४ ॥

इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाभि-
नवतापक्षयाभिनवगदाभिनवामृतादिबहुग्रन्थकर्तॄणां अ-

गत्पूज्यपादुकानां श्रीमत्सत्यनाथश्रीपादानां शिष्येण सत्याभि-
नवयतिना कृतायां श्रीमन्महाभारततात्पर्यनिर्णयटिप्प-
ण्यां दुर्घटार्थप्रकाशिकायां द्वात्रिंशोऽध्यायः ॥

Subject: Bhāratatātparyanirṇayavyākhyā—Durghaṭārtha-prakāśikā I—XXXII Adhyāyas, a commentary on Ānandatīrtha's Mahābhāratatātparyanirṇaya.

Remarks:—The Ms. is in good condition. This work is not printed. The author calls himself the disciple of Satyanātha Tīrtha the author of Abhinavatāṇḍava and Abinavagadā and other works noticed later.

॥ महाभारततात्पर्यनिर्णयव्याख्या—भावचन्द्रिका ॥

7899. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ—BHĀVACANDRIKĀ.

Burnell's Catalogue No. 6199. Page 104. Left column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{1}{8}$ inches. Sheets—20 (21-40). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Śrīnivāsa. Incomplete. Not printed.

Beginning:

.. णं नोपपद्यते । मितं प्रियमिति उपचार....रवत् । स
एव दोषः । ...दित्युक्तम् । 'आनेतुमैच्छद्भगवान्स्मा लोकानां
हितकाम्यया । ' इति पुराणोक्तवचनात्किहेत्वन्तरसूचनाय

विभागेनोक्तिः । मित्रे चर्षौ । विश्वशब्दस्य दीर्घः स्या-
न्मित्रशब्दे परतः ऋषौ वाच्येत्युक्ते विश्वामित्र इति
साधुः । आश्रमस्था जनाः प्रत्युद्गम्य पूजयामासुरित्येत-
दाह । सि...रिति शूरेणेति ॥

* *

अतो न क्षीरनीरा प्रतिप....म्... । सुचिरं द्वादशवर्ष-
कालम् ॥ इति श्रीतात्पर्यनिर्णये भावचन्द्रिकायां +
चतुर्थोऽध्यायः ॥

End:

सन्ध्याकाले च नमः कीर्तिकरमित्यत आह । अयशो
विहीन इति । पीडकत्वमल्पमिति वक्तुं कुवलयपीड
इति वक्तव्ये कुवलयापीड इत्याह । एभ्यं इभनियन्तारं
अन्धतमो यथावित्यत्र पूर्वोक्तं ज्ञेयम् । द्वेषिण इत्युक्तौ
नित्यसंसारिणः द्वेषो भक्तिश्चास्ति इति तद्व्यावृत्तये अभ-
क्ता इत्याह ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमत्तात्पर्यनिर्णये भाव-
चन्द्रिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्री कृष्णार्पणमस्तु ॥

Subject: Bhāratatātparyanirṇayavyākhyā, otherwise known as Bhāvacandrikā IV-XIII Adhyāyas.

Remarks:—The Ms. is in a fairly good condtion. This Ms. abruptly begins with the close of the 4th and ends abruptly with the 18th Adhyāya. This author is the author of other works a commentary called Prakāśa on Vyāsa Tīrtha's Nyāyāmṛta and also a commentary on Ānandatīrtha's Bhāgavatatātparyanirṇaya. He is the desiple of Yādavācārya.

॥ महाभारततात्पर्यनिर्णयव्याख्या—प्रकाशः ॥

7900. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 6028. Page 103. Right column. Substance—Paper. Size—13⅜×6 inches. Sheets—476 (1-496 of which 341-361 are wanting). Lines—10 to 15 to a Page. Script—Devanāgarī. No. of Granth as—18880 Author—Varadarāja. Complete. Not Printed.

Beginning:

॥ मूलम् ॥

श्रीवेदव्यासाय नमः ॥ श्रीगुरुभ्यो नमः ॥

ॐ नारायणाय परिपूर्णगुणार्णवाय + नमस्ते ॥

॥ व्याख्या ॥

श्री वेदव्यासाय नमः । श्रीमदानन्दतीर्थभगवत्पादा-

चार्येभ्यो नमः ॥

॥ ॐ ॥

आनन्दतीर्थहृत्पद्मकर्णिकावासमच्युतम् ।

नत्वा भारततात्पर्यनिर्णयं विवृणोम्यहम् ॥ १ ॥

अथमहाभारततात्पर्यनिर्णयव्याजेन सकलशास्त्रार्थतात्पर्यं दर्शयितुकामी भगवानाचार्यः स्वयमन्तरायविधुरोऽपि निरन्तरायप्रारीप्सितपरिसमाप्त्यादिहेतुभूतमिष्टदेवतानतिरूपं मङ्गलं शिष्यान् ग्राहयितुं अनुष्ठितं ग्रन्थादौ निबध्नाति ॥ नारायणेति ॥

End :

॥ मूलम् ॥

यः सर्वगुणसंपूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीतये...लं विष्णुर्मे परमः सुहृत् ॥ १८२ ॥

॥ व्याख्या ॥

इदानीं मम ग्रन्थकृतफलवत्त्वेन विष्णोः प्रीतिरेवाशास्ते ॥ य इति ॥ यो विष्णुः सर्वैर्गुणैः संपूर्णः सर्वैः पारतन्त्र्यादिभिर्दोषैर्विवर्जितः यतो मे परमः सुहृत् सर्वस्मात् सर्वदा प्रियः अतः सर्वदा प्रिय एवेदानीं अलं विशेषतः प्रीयतां प्रीतोऽस्तु इत्यशेषमति मङ्गलम् ॥ २१८ ॥

Colophon :

इति श्रीमदानन्द + भारततात्पर्यनिर्णये । द्वात्रिंशोऽध्यायः ॥

श्री वेदव्यासाय नमः । श्रीमदानन्द + नमः ॥

इति श्रीमदानन्दतीर्थभारततात्पर्यनिर्णये टीकायां भावार्थप्रकाशस्य

टीकायां मन्दसुबोधिनीकृतायां वरदराजेन विदुषा प्रीतये हरेः ॥

श्रीकृष्णार्पणमस्तु ॥ याचकात्सततं + इत्युक्तो याति पुस्तकम् ॥

Subject: Bhāratatātparyanirṇayavyākhyā—Mandasubodhinī otherwise known as Bhāratārthaprakāśa.

Remarks:—The Ms. is in good condition.

This is another big commentary on Ānanda Tīrtha's Mahābhāratatātparyanirṇaya.

॥ महाभारततात्पर्यनिर्णयव्याख्या—प्रकाशः ॥

7901. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 6198. Page 104. Left column. Substance—Paper. Size—$9\frac{1}{2}\times4\frac{1}{8}$ inches. Sheets—30 (29-58). Lines—10-15 to a Page. Script—Devanāgarī. No. of Granthas—780. Author—Varadarāja. Incomplete. Not Printed.

Beginning:

...पादं पादमात्रतो याममात्रे वा व्यापारयन् प्रवर्तयामासुः । वृकोदरादिभिः क्षणाज्जिताः हयाश्वादिव्यवाहा ...पादमात्रात्...दिनमात्रेण लक्षयोजनां गन्तुं क्षमः समर्थः सह यः कृष्णनिर्मितः कृतः दिनाश्वमेधसिद्धये + अमुं अर्जुनं जगाद । किमिति ॥

End :

नित्यशो दिने दिने शतं सुवर्णभारान् ददाति । असौ युधिष्ठिरो वन···विप्रैः साकं मुमोद । पार्थेषु वनं प्रतियातेषु अत्र नागपुरे किं कार्यमित्यग्रजेन धृतराष्ट्रेण पृष्टः पार्थो ।

Colophon :

इति श्रीमन्महाभारततात्पर्यनिर्णयटीकायां वरदराज विद्वत् कृतौ एकत्रिंशोऽध्याय:

Subject: Bhāratatātparyanirṇavavyākhyā. XX & XXI Adhyāyas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly begins in the middle of the commentary of the 20th Adhyāya and ends abruptly in the middle of the commentary of the 21st Adhyāya.

॥ महाभारततात्पर्यनिर्णयव्याख्या ॥

7902. MAHĀBHĀRATATĀTPARYANIRṆAYA-VYĀKHYĀ.

Burnell's Catalogue No. 5197. Page 104. Left column. Substance—Paper. Size—10 × 4⅛ inches. Sheets—24. Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Viṭṭhalācāryasūnu. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थार्यहृदयाम्बुजवासिनम् ।
रमाबाहुलताश्लिष्टं नारायणमहं भजे ॥ १ ॥

श्रीमदानन्दतीर्थार्यतरणिर्नो हृदम्बरे ।
लसदज्ञानतमसं हन्याद्विज्ञानसद्भाभिः ॥ २ ॥

श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
उद्धार सुधां वन्दे तमहं जययोगिनम् ॥ ३ ॥

वेदान्तभाष्यनिचयं तथा भारतनिर्णयम् ।
विवृतं येन तं वन्दे व्यासतीर्थाभिधं मुनिम् ॥ ४ ॥

श्रीमदानन्दतीर्थार्यकृतशास्त्रपयोनिधिम् ।
यो विचार्य ददौ ज्ञानं शुद्धं तं गुरुमाश्रये ॥ ५ ॥

श्रीविठ्ठलार्यतनुजश्रीमत्तीर्थार्यसद्गुरोः ।
स्मृत्वा पदाब्जे व्याकुर्वे महाभारतनिर्णयम् ॥ ६ ॥

भगवानानन्दतीर्थमुनिः सकलसदागमानां निर्णयं भारतस्य सर्वोत्तमत्वेन विनिश्चित्य तदनुसारेण करिष्यन् निलीनप्रकृतितयाऽन्तरायविधुरोऽपि शिष्यान् शिक्षयितुं स्तुतिनतिरूपं मङ्गलमाचरति ॥ नारायणायेति ॥

End:

॥ कुम्भकोणमाहात्म्ये ॥

तस्य पार्श्वे महत्तीर्थं मात्स्यं निश्रेयसः पदम् ।

पुरा प्रतिष्ठितं लिङ्गं विष्णुना मत्स्यरूपिणा ॥

अद्यापि मत्स्यास्तिष्ठन्ति शङ्करस्य प्रसादतः ॥

कृतङ्गावतीर्णमत्स्यरूपविष्णोः लिङ्गप्रतिष्ठापक... ।

Subject: Bhāratatātparyanirṇayavyākhyā. Fragment only.

Remarks:—The Ms. is in good condition.

॥ महाभारततात्पर्यनिर्णयव्याख्या—

पदार्थप्रदीपिका ॥

7903. MAHĀBHĀRATATĀTPARYANIRṆAYA-

VYĀKHYĀ—PADĀRTHAPRADĪPIKĀ.

Burnell's Catalogue No. 6033. Page 103. Right column. Substance—Paper. Size—11 × 6¼ inches. Sheets—66. Lines—14-21 to a Page. Script—Devanāgarī. No. of Granthas—2750. Author—Janārdanabhaṭṭa. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ।

॥ मूलम् ॥

नमामि... परिपूर्णगुणार्णवाय

विश्वोदयस्थितिलयादिनियामकाय ।

ज्ञानप्रदाय विबुधासुरसौख्यदुःख-

सत्कारणाय विततायं नमो नमोऽस्तु ॥ १ ॥

॥ व्याख्या ॥

श्री वेदव्यासाय नमः ॥

नारायणं पूर्णगुणैकदेहं जन्मादिदं ज्ञाननिबन्धहेतुं ।
विश्वस्य भक्तेतरसौख्यदुःखसद्धेतुमीशं विततं नमामि ॥ १ ॥

नमामि नीलाम्बुदकान्तिकान्तं व्यासं निरस्ताखिलदोषपुञ्जम् ।
ज्ञानादिदं ब्रह्मशिवादिकेभ्यः सच्चक्रमुद्राभयहस्तयुक्तम् ॥ २ ॥

जयति श्रीमदानन्दतीर्थमार्ताण्डचण्डगौः ।
सत्संपर्कवती मोहशर्वरीं समदीदलत् ॥ ३ ॥

गुरून्नत्वा भारतार्थनिर्णयस्य प्रदीपिका ।
व्यासतीर्थादिसद्व्याख्यामाश्रित्य क्रियते मया ॥ ४ ॥

महाभारततात्पर्यनिर्णयस्य प्रदीपिकाम् ।
कर्तुमुद्योगिनः सन्तः क्षाम्यन्तु मम दुर्नयम् ॥ ५ ॥

क्व श्रीमध्वगुरोरुक्तिः क्व तदर्थम(प्र)दाग्रहः ।
क(ख)द्योतीरोचिषा कोऽपि विभातुं कर्तुमीहते ॥ ६ ॥

ज्ञानाधिकेषु संवादात्पूर्वापरविमर्शनात् ।
लेखनाद्बुद्धिशुद्धिर्यत्मार्थो मे जायते श्रमः ॥ ७ ॥

तत्रादौ श्रीमदानन्दतीर्थाः सकलपुराणार्थनिर्णयं वि-
शेषतो भारतीयार्थनिर्णयञ्च चिकीर्षवः प्रारीप्सितपरिसमा-

ष्त्यादिप्रयोजनकमन्येषां स्वेन च स्वभावतः कृतं मंगलं शास्त्रप्रतिपाद्यगुणयुतस्वेष्टदेवतानमस्काररूपं शिष्याशिक्षायै निबध्नन्ति ॥ नारायणेति ॥

End :

॥ मूलम् ॥

पाश्चात्यकल्पेष्वपि सर्गभेदाः
श्रुतौ पुराणेष्वपि चान्यथोक्ताः ।
नोत्कर्षहेतुः प्रथमत्वमेषु
विशेषवाक्यैरवगम्यमेतत् ॥

॥ व्या ॥

पुरैव पश्चादित्यादिना यदुक्तं तदप्युपसंहरति ॥ पाश्चात्येति ॥ पाश्चात्यकल्पेषु पाद्मकल्पातिरिक्ता वान्तरकल्पेषु श्रुतौ श्रुतिषु पुराणेष्वपि सर्गभेदाः अन्यथा आदिकल्पोदितसर्गवैपरीत्येन उक्ताः कथिताः एषु पश्चात्पद्मकल्पेषु प्रथमत्वं आदौ जननं उत्कर्षहेतुः उत्तमत्वकारणात् । नन्वेवं चेन्निर्णयः कथमित्यत आह ॥ विशेषेति ॥ विशेषवाक्यैर्विशेषप्रमाणैरेतत्प्रमेयं तारतम्यादि अवगम्यम् अवगन्तव्यम् ॥ ८५ ॥

यं गङ्गा जमदग्निजान्वयभवाद्विद्वद्धिरण्याभिधा-
त्पुत्रं प्राप जनार्दनं शमदमस्वाध्यायसंपद्युतात् ।

पूर्तिस्तस्य कृतौ सतां सुखकरोऽध्यायस्तृतीयः क्रमः
श्रीमद्भारतभावनिर्णयवदाचार्योदितं विकमनात् ॥

Colophon:

॥ मू ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्महाभारततात्पर्यनिर्णये सर्गानुसर्गोदयप्रादुर्भावनिर्णयो नाम तृतीयोऽध्यायः ॥

श्रीकृष्णार्पणमस्तु ॥

Colophon :

(व्या) इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भारततात्पर्यनिर्णयस्य टीकायां जनार्दनभट्टविरचितायां पदार्थदीपिकायां तृतीयोऽध्यायः ॥

तुम्मतिसत्याधिराजेन लिखितं पुस्तकं समाप्तम् ।

Subject: Bhāratatātparyanirṇayavyākhyā—Padārthadīpikā, I to III Adhyāyas.

Remarks:—The Ms. is in good condition.

॥ महाभारततात्पर्यनिर्णयानुक्रमणिका ॥

7904. **MAHĀBHĀRATATĀTPARYA-NIRṆAYĀNUKRAMAṆIKĀ.**

Not noticed by Burnell Ms. No. 14771.

Substance—Paper. Size—$9\frac{1}{2} \times 18$ inches. Sheets—2. Lines—30 to a Page. Script—Devanāgarī. No. of Granthas—70. Author—? Incomplete. Not Printed.

Beginning:

श्रीहयग्रीवाय नमः ॥

सर्वेशः स्वस्वरूपैः सकलगुणमयैर्दोषरूपैर्विचित्रां
लीलां सन्दर्शयन्स्वां सुरमुनिनृवरान् मोदयन् श्रीसहायः ।
अध्यास्ते स्वां त्रिलोकीमिति निगमगुणा संगिरन्ते विरामं
ग्रन्थाः श्रीभारताद्या अपि मुनिकृतयो मानतां तत्र चापुः ॥

पारं मे गुरभेदनस्य बहुशो वल्मीकजन्मादिभि-
र्ये श्लोका स्थिता विरोधकणिकां कुर्वेति नो मोहकाः ।
ये श्लोका हृदयं विवक्षुरकरोत्तेषां भृशं पूर्णधीः
श्रीमद्भारतहार्दनिर्णयकरं ग्रन्थं बुधानां मुदे ॥ २ ॥

भगवत्कृतलोकमोहलीलामनुसृत्यैव यदस्ति पद्यजातम् ।
श्रुतिलोकनिदर्शनान्मुनीन्द्रस्तदभिप्रायमिह व्यनक्ति सम्यक् ॥

इह खलु भगवानानन्दतीर्थमुनिरध्यायद्वयेन सकलस-च्छास्त्रार्थान् संक्षेपतोऽभिधाय तृतीयाध्यायेनादौ सृष्टि-क्रममुक्त्वा पश्चात् संक्षेपतो भगवदवतारानभिधायान्ते श्रीरामकथां संक्षेपतो वक्तुमुपक्रामन्निदानीं चतुर्थाध्या-येन बालकाण्डकथां वक्ति ॥

End.

न चैतच्छूरधर्म इत्यतस्तात्पर्यमाह । भक्त इत्यादि-श्लोकद्वयेन ॥ १९ ॥ श्लोकः इतःपरमध्यायपर्यवसानान्ताः

॥ १९ ॥ श्लोकाः । किष्किन्धाकाण्डीयोत्तरकथाप्रतिपाद

नपराः ॥

Colophon:

इति षष्ठोऽध्यायः

Subject: Bhāratatātparyānukramaṇikā, an index of Ānanda-tīrtha's Mahābhāratatātparyanirṇaya.

Remarks:—The Ms. is in good condition.

॥ महाभारततात्पर्यनिर्णयानुक्रमाणिका ॥

7905. MAHĀBHĀRATATĀTPARYA-NIRṆAYĀNUKRAMAṆIKĀ.

Not noticed by Burnell Ms. No. 14770.

Substance—Paper. Size—12×8 inches. Sheets—4. Lines—25 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमन्महाभारततात्पर्यानुक्रमाणिका ॥ १ अध्यायी १

पत्री १ श्लोक । इष्टदेवतारूपभगवद्वन्दनात्मकमंगलाचर-

णाच । शक्करीच्छन्द भेदवसन्ततिलकवृत्त । परिकराङ्कु-

रालङ्कार ।

End:

सृष्टिप्रतिपादकप्रमाणविशेषाकडून प्रथमकल्पास उत्त-

मत्वज्ञापक म्हणून म्हणून प्रमेयप्रतिपादन भगवत्पादा-
चार्यांनीं केले ॥

Colophon:

हा तृतीयाध्यायार्थः । तृतीयोऽध्यायः ॥

Subject: Bhāratatātparyanirṇayānukramaṇikā. I-III Adhyāyas.

Remarks:—The Ms. is in good condition.

॥ भागवततात्पर्यनिर्णयः ॥

7906. BHĀGAVATATĀTPARYANIRṆAYAḤ.

Burnell's Catalogue No. 6226. Page 104, Right column. Substance—Paper. Size—7½ × 2 inches. Sheets—228. Lines—6 or 7 to a Page Script—Devanāgarī No. of Granthas—8050. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

गुरुभ्यो नमः ॥

भागवततात्पर्यं लिख्यते ॥ अविघ्नमस्तु ॥ ॐ ॥

सृष्टिस्थित्यप्ययेहानियतिदृशितमोबन्धमोक्षाश्च यस्मा-
दस्य श्रीब्रह्मरुद्रप्रभृतिसुरनराधीशशक्रात्मकस्य ।

विष्णोर्व्यस्ताः समस्ताः सकलगुणनिधिः सर्वदोषव्यपेतः

पूर्णानन्दोऽव्ययो यो गुरुरपि परमश्चिन्तये तं महान्तम् ॥

End:

तस्माद्विष्णोरसङ्कल्पं न भूतभव्यभवत्स्वपि ।

न चानिष्टं गुणैरेव पूर्णो नारायणः सदा ॥ इति वामने ॥

नित्यादोषस्वरूपाय गुणपूर्णाय सर्वदा ।

नारायणाय हरये नमः प्रेष्ठतमाय च ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्कन्धतात्पर्य-

निर्णयः समाप्तः ॥

शके गतवर्षाणि १६ शे ८४ चित्रभानुसंवत्सरचैवहेमन्तऋतौ मार्ग-

शीर्षवदि नवमी गुरुवासरे उत्तरानक्षत्र आयुष्मान्नामयोगे तैतुला-

करणे भागवततात्पर्यनिर्णयः समाप्तिमगमत् ॥

श्रीरस्तु ॥

Subject: Bhāgavatatātparyanirṇaya, 1-12 Skandhas, a work on theological significance of Bhāgavata.

Remarks:—The Ms. is in good condition.

This is published at Bombay in Sarvamūlam edited by T. R. Kṛṣṇācārya.

BHĀGAVATATĀTPARYANIRṆAYAḤ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7907	B. L.	5756 a.	Paper.	$16\frac{1}{2} \times 8\frac{1}{2}$	54	20-22	Devanāgarī.	I-XII Skandhās.
7908	,,	6285	,,	$8\frac{1}{2} \times 8\frac{1}{2}$	10	20-23	,,	I-III ,,
7909	,,	6125	,,	$11\frac{1}{2} \times 4\frac{1}{2}$	23	9 or 10	,,	I & II ,,
7910	,,	6027	,,	$6\frac{3}{4} \times 2\frac{7}{8}$	5	10	,,	V ,,
7911	,,	6025	,,	$9\frac{1}{2} \times 4$	6	11	,,	VI ,,
7912	,,	6026	,,	$9\frac{1}{2} \times 3\frac{7}{8}$	12	10 or 12	,,	VIII-X ,,

॥ भागवततात्पर्यनिर्णयव्याख्या—दीपिका ॥

7913. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—DĪPIKĀ.

Burnell's Catalogue No. 6012 a & b. Page 104. Left column.

Substance—Paper. Size—13⅜ × 5 inches. Sheets—65. Lines—10-19 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Narahari. Incomplete. Not Printed.

Beginning :

श्री वेदव्यासाय नमः ॥

॥ मूलम् ॥

ॐ सृष्टिस्थित्यप्ययेहानियति + गुरुरपि परमश्चिन्तये
तं महान्तम् ॥

॥ व्याख्या ॥

उत्पत्तिः स्थितिसंहतीनियमनं ज्ञानावृतीबन्धनं
मोक्षश्चास्य यतो भवन्ति जगतः संक्षेपतो विस्तरात् ।
जिज्ञास्यं निगमैकगम्यममलं पूर्णो गुणैश्चान्वयात्
तं श्रीनाथमहं भजे नरहरिं सर्वज्ञचूडामणिः ॥ १ ॥

हृदन्धकारापहृदंशु(सु)बोधनवीनतानुकूदयाम्बरे मे ।
आनन्दतीर्थो लसताद्गुरुश्च प्रसीदतु श्रीजयतीर्थवर्यः ॥ २ ॥

श्रीमदानन्दतीर्थानां केवलं करुणाबलात् ।
श्रीभागवततात्पर्यदीपिका क्रियते मया ॥ ३ ॥

इह हि सांसारिकविविधदुःखजातेन क्लिश्यमानजनानुकम्पया ब्रह्मरुद्रादिभिरर्थितो भगवान् व्यासत्वेनावतीर्याप्येष्टानिष्टप्राप्तिपरिहारसाधनमजानतां तदुपदेशार्थं श्रीमद्भागवतसंहितामचीक्लृपत् । ताञ्चान्यैरन्यथा व्याख्यातां यथावद्व्याचिख्यासुर्भगवानानंदतीर्थमुनिः स्वयमन्तरायविधुरोऽपि शिष्यान् ग्राहयितुं मंगलं ग्रन्थादौ ग्रथयति ॥ सृष्टीति ॥

End:

॥ मूलम् ॥

अन्यकल्पानां साधारणः । तत्रैव प्राकृतवैकृताः सर्वे सर्गाः ॥ अन्यब्रह्मकल्पानां च साधारणः ।

॥ व्याख्या ॥

प्रकारान्तरेण विधिः साधारण इत्येतद्विवृणोति । अन्येति । तेनान्यब्रह्मकल्पानां इति शेषोक्त्या प्राकृतवैकृतसर्गत्वेनैव सर्वब्रह्मकल्पानां साधारणमुक्तं भवतीति भावः ।

Colophon:

॥ मू ॥ इति श्रीमद्भागवते महापुराणे तात्पर्यविनिर्णये मध्वकृते द्वितीयस्कन्धे दशमोऽध्यायः ॥

॥ व्या ॥ इति श्रीमद्भागवते महापुराणे तात्पर्यनिर्णयदीपिकायां नरहरिकृतायां द्वितीयस्कन्धे दशमोऽध्यायः । समाप्तोऽयं द्वितीयस्कन्धः । १५१७ ग्रन्थसंख्या १—५२ ॥

Subject: Bhāgavatatātparyanirṇayavyākhyādīpikā, a commentary on Ānanda Tīrtha Bhāgavatatātparya Nirṇaya.

Remarks:—The Ms. is in good condition.

This work is not printed. None of the commentaries thereon seems to have been printed.

BHĀGAVATATĀTPARYANIRṆAYAVYĀKHYĀ—DĪPIKĀ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page. or sheet.	Script.	Complete or otherwise.
7914	B. E.	6013	Paper.	$13\frac{1}{8} \times 6$	23	14-17	Devanāgarī.	I Skandha.
7915	,,	6014	,,	$12\frac{3}{4} \times 5$	47	12-14	,,	II ,,
7916	,,	6015	,,	$8\frac{3}{4} \times 3\frac{1}{2}$	97	10-12	,,	III ,,
7917	,,	6016	,,	$13\frac{7}{8} \times 5\frac{1}{2}$	51	11-15	,,	IV ,,
7918	,,	6017	,,	$13\frac{1}{2} \times 5\frac{1}{2}$	13	13-16	,,	V ,,
7919	,,	6018	,,	$13\frac{1}{2} \times 5\frac{1}{2}$	33	11	,,	VI ,,
7920	,,	6020	,,	$10 \times 4\frac{1}{2}$	135	10-13	,,	VII-XI.

DETAILED REMARKS

on the

BHĀGAVATATĀTPARYADĪPIKĀ MSS.

IN THE ABOVE TABLE.

7916

इति श्री + चतुर्स्त्रिंशोऽध्यायः ॥

वरदाचार्य + हरेः ॥

तृतियस्कन्धदीपिका समाप्ता ॥

भावसंवत्सर आषाढबहुलप्रतिपद्बुधवारे नृसिंहाचार्यसुतनृहरिणा तृतीयस्कन्धतात्पर्यं लिखितम् ॥

॥ भागवततात्पर्यनिर्णयव्याख्या—तात्पर्यबोधिनी ॥

7921. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—TĀTPARYABODHINĪ.

Burnell's Catalogue. No. 6084. Page 103. Right column. Substance—Paper. Size—14½×6 inches. Sheets—84 (3-86 68th wanting). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—3800. Author—? Incomplete. Not printed.

Beginning :

॥ मूलम् ॥

ज्ञात्वा तत्र प्रेमयुक्तस्तद्भक्तेषु च मैत्रियुक् ॥ १४ ॥

कृपाघांश्च तदङ्गेषु [त]द्वेषिणामुपदेष्टकः ।
तद्वशत्वं न जानाति सर्वस्य जगतोऽपि तु ॥ १५ ॥

॥ व्याख्या ॥

भगवद्भावं भगवच्छब्दवाच्यं भावं * * प्रमाणेन तात्पर्यार्थमाह । सर्वाधिकमित्यादिना । च शब्दो विशेषणसमुच्चये । अनेन सर्वजगतो भगवद्वशत्वाज्ञत्वे सतीश्वरादौ प्रेमादियुक्तत्वं मध्यमभक्तस्य लक्षणम् । तत्तू-त्तमभक्ते नास्ति । उत्तमभक्तस्य सर्वजगतो भगवद्वशत्वाज्ञ-त्वात् अधमभक्ते तु वक्ष्यमाणतल्लक्षणेनैवातिव्याप्तिः परि-हरिष्यत इत्युक्तं भवति ॥

End :

॥ मू ॥ मदन्यः कश्चन कोऽपि न वेद *
प्रतिशाम्यति वेदोऽयं वासुदेवैकसंश्रय इति च ।
अभिधामास्थाय कोऽपि शब्दो मेति वा ॥

॥ व्या ॥ मदन्य इति ॥ ४३ ॥

एतावान्सर्ववेदार्थ इति श्लोके शब्दः वेदः भिदां जी-वेश्वरादिभेदं मा आस्थाय अनाश्रित्य त्यक्त्वा मायामात्र-मविद्याकल्पितं जगदनद्योते ? प्रतिषिध्य स्वयं शाम्यति । बाध्यत इति । यद्वादि सर्वजगतो मिथ्यात्वमुच्यत इत्य-न्यथाप्रतीतिनिरासाय स्वयं सम्यग्व्याचष्टे । अभिदश्च स

एव अश्वेति । अनेनाविद्यमाना भिद्रा भेदो यस्मिन् स आदिमः अभिद्श्वासावश्वेत्यभिदाः । तं भिधामिति? भागवतपद्स्य विग्रह उक्तो भवति । स्वोक्तार्थप्रमाणमाह । सर्वोत्रताररूपेष्विति । अकारस्यार्थः । ....प्रथमस्तु विशेष

Colophon: (Sheet No. 78)

इति श्रीमद्भागवत एकादशस्कन्धतात्पर्ये विंशोऽध्याय:

इति श्रीभागवते. ता. प्र. विंशोऽध्याय:

Subject. Bhāgavatatātparyanirṇayavyākhyā — Tātparyabodhinī, 8 to 21 Adhyāyas of the XI Skandha.

Remarks:—The Ms. is in good condition. This Ms, abruptly begins with the 3rd Adhyāya of the XI Skandha and ends in the middle of the 21st Adhyāya. The author's name is not known.

॥ भागवततात्पर्यनिर्णयव्याख्या—विवरणम् ॥

7922. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 6023. Page 104. Right column.

Substance—Paper. Size—13⅜ × 5⅜ inches. Sheets—49. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—?. Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥ श्रीसरस्वत्यै नमः ।

भूतानां देवचरितं दुःखाय च सुखाय च ।

सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥

भजंति ये यथा देवदेवा अपि तथैव तान् ।

छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ २ ॥

इत्यत्र देवचरितं भूतानां सुखाय दुःखाय च साधूनां सुसुखायैवेत्युक्त्या देवापेक्षया नारदादीनामेवोत्तमत्वमुच्यत इति भाति ॥

End:

अन्यथा भक्त्यादिकमपि न स्यादित्याशंक्य प्रमाणेनैव नियममाह ॥ पापेति ॥ अवरे कृतपापद्वेषादयः अवराणामेव नोत्तमानामित्यर्थः । उक्तार्थे श्रुतिमप्याह । यदु किं चेमा इति ॥

Colophon:

इति श्रीमद्भागवततात्पर्यविवरणे एकादशस्कन्धे

द्वादशोऽध्यायः ॥

Subject: Bhāgavatatātparyanirṇayavyākhyāvivaraṇa XII. skandha.

Remarks:—The Ms. is in a decaying condition.

—+—

॥ भागवततात्पर्यनिर्णयव्याख्या—प्रबोधिनी ॥

7923. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—PRABODHINĪ.

Burnell's Catalogue No. 6019. Page 104. Right column. Substance—Paper. Size—13¾ × 4⅞ inches. Sheets—23. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—?. Incomplete. Not printed.

Beginning:

॥ मूलम् ॥

श्री वेदव्यासाय नमः । श्री गुरुभ्यो नमः ॥

वेदानां प्रथमो वक्ता हरिरेव यतो विभुः ।
अतो विष्ण्वात्मका वेदा इत्याहुर्वेदवादिनः ॥

इति शब्दनिर्णये ॥

॥ व्याख्या ॥

वेदप्रणिहितो धर्म इति श्लोके वेदो नारायणः साक्षादित्यनेन शब्दरूपजडवेदस्य नारायणैक्यमुच्यते तत्प्रमाणबाधितमित्यतः प्रमाणेनैव तत्तात्पर्यार्थमाह ॥ वेदानामिति ॥

End:

॥ मूलम् ॥

'नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चन' इति ब्रह्मतर्के ॥

॥ व्याख्या ॥

ततः अन्तर्यामित्वादेव विष्णुर्न केवलं यज्ञादेरेवान्तर्यामी अपि तु श्रियश्चान्तर्यामी विष्णुस्तु क्वापि कुतश्चन कश्चिदपि नान्तर्याम्यस्तीत्यर्थः । अन्तर्यामी श्रियश्चापीत्यनेन त्वं इदं लक्ष्मीश्च लक्ष्यन्तर्यामी चेति भागवतस्य क्रियेयमिति द्वितीयेयं शब्दस्यार्थ उक्तो भवति । तेन तस्य वैयर्थ्यशङ्का निरस्ता भवति ॥

Colophon.

श्रीमन्महाभागवततात्पर्यनिर्णये षष्ठस्कन्धे एकोनाविंशोऽध्यायः ।
इति गोपालकृष्णार्पणमस्तु । श्रीकृष्णाय नमः ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य भागवतषष्ठस्कन्धतात्पर्यनिर्णयस्य टीकायां प्रबोधिन्यां एकोनविंशोऽध्यायः

Subject: Bhāgavatatātparyanirṇayavyākhyā—Prabodhinī VI. Skandha.

Remarks:—The Ms. is in good condition.

॥ भागवततात्पर्यनिर्णयव्याख्या—पद्यरत्नावली ॥

7924. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—PADYARATNĀVALĪ.

Burnell's Catalogue No. 6024. Page 104. Right column.
Substance—Paper. Size—6⅜ × 2½ inches. Sheets—67.

Lines—8 to 10 to a page. Script—Devanāgarī. No. of thas—1150. Author—?. Incomplete. Not printed.

Beginning:

श्री गुरवे नमः ॥

आत्मनो भजने बुद्धिमुत्पाद्य फलदाः सुराः ।
उत्तमानां जनानान्तु निकृष्टानां विपर्ययः ॥ १ ॥

शुभाशुभफलानान्तु कर्मणां विबुधाः सुराः ।
प्रवर्तका यथायोग्यमृषयः करुणाः सदा ॥

तस्माद्विष्णोरशक्यं न भूतभव्यभवत्स्वपि न चादृष्ट-
गुणैरेष पूर्णो नारायणः सदेति वामने

End:

नित्यशेषस्वरूपाय गुणपूर्णाय सर्वदा ।
नारायणाय हरये नमः प्रेष्ठतमाय मे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्कन्धता-
त्पर्यनिर्णये पद्यरत्नावल्यां द्वादशस्कन्धः समाप्तः ।

श्रीपरिमलरङ्गात्मकः श्रीवेङ्कटेशः प्रीयताम् ॥

Subject: Bhāgavatatātparyanirṇayavyākhyā — Padyaratnāvalī XI & XII Skandhas. A metrical commentary on the same work.

Remarks:—The Ms. is in good condition. This Ms. abruptly begins with the XI Skandha and ends with XII Skandha.

॥ भागवततात्पर्यनिर्णयव्याख्या—प्रकाशः ॥

7925. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 6021. Page 104. Right column. Substance—Paper. Size—$13\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—91 (10.-191). Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—4500. Author—Śrīnivāsa. Incomplete. Not printed.

Beginning:

श्री गुरुभ्यो नमः ॥ हरिः ॐम् ॥

यदा त्वयं मन्त्रकृद्द इति यदा तु राजेत्यादौ च यदा शब्दानां कालवाचित्वे विदुरस्यानेककालेषु तीर्थयात्रागमनं विरुद्धमित्युच्यत इत्यतः स्वाद्यो यदाशब्दः कालवाचीत्याह । युद्धकाल इति ॥

End:

अत्र स्कन्धे माधवः प्रतिपाद्यः । उपक्रमे भवानखिलेश्वर इति पुत्रकोशादिति संपत्प....तिक्तमायाः संपदः पतिः धरः पतिः माधवः उपसंहारे कपिलाख्यः परः पुमानिति क्षराक्षरपुरुषोत्तमत्वोक्तमायाः लक्ष्म्याः धवः पतिर्माधव इति ।

संपत्प्रदोमापतिश्च माधवो हरिरीरितः ।
आनन्दतीर्थवंद्यः स ममानन्दं दिशेत्सदा ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततृतीयस्कन्धतात्पर्य-
निर्णयप्रकाशे श्रीनिवासविरचिते चतुस्त्रिंशोऽध्यायः ॥
तृतीयस्कन्धः समाप्तः ॥

Subject: Bhāgavatatātparyanirṇayavyākhyā—Prakāśa III Skandha.

Remarks :—The Ms. is in good condition.

॥ भागवततात्पर्यनिर्णयव्याख्या—प्रकाशः ॥

7926. BHĀGAVATATĀTPARYANIRṆAYA-VYĀKHYĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 6022. Page 104. Right column. Substance—Paper. Size—13⅜ × 5½ inches. Sheets—57 (275-336). Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—2650. Author—Śrīnivāsa. Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥ ॐ ॥

यथा । स्वप्ने यथा पश्यति देहमीदृशमित्युक्तम् ।
स्वप्नप्रायेण बाह्यपदार्थज्ञानाभावात् ॥

इत्याशङ्क्य सोपपादकं व्याचष्टे । स्वप्न इति । स्वस्वप्ने
यथेत्युक्तत्वात्तत्र च बाह्यस्य तत्र प्रतीतेरीदृशं देहमि-

त्यस्य दृष्टस्मृत्यनुसारी देहमित्यस्य यो दृष्टः यश्च श्रुतः यश्च पुनः पुनः स्मर्यते तत्संस्कारोपादानकं देहमित्यर्थ इति भावः ॥

End:

दिनाश्वमेधः खाण्डवदाहानन्तरं रविस्यमन्तपञ्चकग-मनानन्तरं द्वारकायां कृष्णेन कृत इति ज्ञेयम् । तथा भारततात्पर्यनिर्णये एकविंशाध्यायोक्तेः । अत्र स्कन्धे हृषीकेशः प्रतिपाद्यः हृषी पूर्णसुखवान् कृष्णः शुक्लकेशा-त्मकश्चेति । हृषीकेशः । सर्वेष्वेतेषु तन्महिम्नः कथनात् ।

सुखवत्त्वात् केशवत्त्वाद्धृषीकेश उदाहृतः ।
आनन्दतीर्थवंद्यः स ममानन्दं दिशेत्सदा ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितदशमस्कन्धभागवत-तात्पर्यनिर्णयप्रकाशे श्रीनिवासविरचितः समाप्तः ॥
श्रीनिवासाय नमः ॥ श्रीकृष्णार्पणमस्तु हरिः ॐ ॥

Subject: Bhāgavatatātparyanirṇayavyākhya—Prakāśa Skandha. X

Remarks:—The Ms. is in a decaying condition.

॥ भगवद्गीतातात्पर्यनिर्णयः ॥

7927. BHAGAVADGĪTĀTĀTPARYANIRṆAYAḤ.

Burnell's Catalogue No. 6286. Page 103. Right column.

Substance—Paper. Size—$8\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—19. Lines—20 to 22 to a Page. Script—Devanāgarī. No. of Granthas—1450. Author—Ānandatīrtha. Complete. Printed.

Beginning :

श्री वेदव्यासाय नमः ॥ हरिः ॥

समस्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ॥

शास्त्रेषु भारतं सारस्तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ॥

End :

वायोरामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

निःशेषदोषरहितकल्याणाशेषसद्गुण ।
भूतिस्वयंभुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गी-
तातात्पर्यनिर्णये अष्टादशोऽध्यायः ॥

श्री सीतालक्ष्मणभरतशत्रुघ्नश्रीहनुमत्समेतश्रीरामचन्द्रार्पणमस्तु ।

श्रीरुक्मिणीसत्यभामासमेतश्रीराजगोपालार्पणमस्तु ॥

Subject : Bhagavadgītātātparyanirṇaya. 1—18 Adhyāyas a dualistic exposition of Bhagavadgītā.

Remarks :—The Ms is in good condition. This work is printed in Bombay in Sarvamūlam edited by T. R. Kṛṣṇācārya.

BHAGAVADGĪTĀTĀTPARYANIRṆAYAḤ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script	Complete or otherwise.
7928	B. L. 5786	Paper.	$7\frac{7}{8} \times 4\frac{1}{4}$	58	10-15	Devanāgarī.	Complete
7929	" 6228	"	$7\frac{1}{8} \times 2$	134	5 or 6	"	"
7930	" 5787	"	$8 \times 3\frac{3}{4}$	29	13 or 14	"	Incomplete.
7931	" 5788	"	$9\frac{1}{2} \times 4$	41 (21-61)	9	"	"

DETAILED REMARKS on the above MSS.

7929 Colophon:—

इति + अष्टादशोऽध्यायः । आंगिरसंवत्सरवैशाखशुद्ध
कुम्भकोणप्राकारस्थव्यासरायसुतेन च ।
श्रीनिवासार्यशिष्येण लिखितं पुस्तकन्त्विदम् ॥

॥ गीतातात्पर्यनिर्णयव्याख्या—न्यायदीपिका ॥

7932. GĪTĀTĀTPARYANIRṆAYAVYĀKHYĀ—NYĀYADĪPIKĀ.

Burnell's Catalogue No. 5789. Page 103. Right column. Substance—Paper. Size—9⅞ × 2⅞ inches. Sheets—164. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—3750. Author—Jayatīrtha. Complete. Not printed.

Beginning:

श्रीनारायणाय नमः ॥ श्री पूर्णप्रज्ञाचार्येभ्यो नमः ॥

इन्दिरावदनाम्भोजराजहंसाय विष्णवे ।
यज्ज्ञानात्परमानन्दः सिद्ध्येद्वाचामगोचरः ।
कारणं जगतामीशं तमानन्दमयं श्रये ॥ १ ॥

इह तावत्पुच्छब्रह्मवादिनः पूर्वपक्षिणः । आनन्दमयब्रह्मवादिनः सिद्धान्तिनश्च वादकथा प्रस्तूयते । पुच्छब्रह्मवादिनस्तावदाहुः । उपक्रमे ब्रह्मविदाप्नोति परमिति मुक्त्युपायभूतज्ञानविषयो ब्रह्मशब्दः प्रयुज्यते । तदर्थं सुखप्रतिपत्तये च अन्नमयादिकोशावतारः । तेन ब्रह्मशब्दो यत्रोपसंह्रियते तदेवोपास्यं ब्रह्मेत्यभ्युपगन्तव्यम् ।

End:

किं चानन्दवल्यां 'तस्माद्वा ये(ए)तस्मादात्मन आकाशस्सम्भूतः' इत्यादिना "सोऽकामयत । बहु स्यां प्रजायेय" इत्यादिना च प्रतिपादितम् । भृगुवल्यां "यतो वा इमानि भूतानि जायन्ते" इत्यादिना पुनरनूदितं ब्रह्मणो मूर्धाभिषिक्तलक्षणं कारणत्वं । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिनानन्दात्मकानन्दमयनिष्ठतया उपसंह्रियमाण आनन्दमयस्य ब्रह्मत्वे निरपवादकारणमिति कथं तद्विरोधिनी पुच्छस्य ब्रह्मताकल्पनेति यत्किंचिदेतत् ।

Colophon:

यतीन्द्रहृदयारूढपुच्छब्रह्मनिराकृतिः ।
निर्णीता श्रीनिवासेन जयतात्प्रीतये सताम् ॥

Subject: Pucchabrahmanirākṛti a treatise particularly dealing with the Ānandamayādhikaraṇa in Śārīrakabhāṣya.

Remarks: —The Ms. is in excellent condition. On the title page is given the following

शेषभट्टात्मजबालाख्यस्य ।

This author has written many works on Dvaita philosophy chief of them being a commentary called Prakāśa on Vyāsa Tīrtha's Nyāyāmṛta. For further remarks see under No. 7899.

॥ प्रमाणपद्धतिः ॥

8111 PRAMĀṆAPADDHATIḤ.

Burnell's Catalogue No. 6037. Page 107. Left column. **Substance**—Paper. Size—$9\frac{1}{8}\times1\frac{3}{8}$ **inches** Sheets—9. Lines—9 to a Page. Script—Devanāgarī No. of Granthas —720. Author—Jayatīrtha. Complete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्री सरस्वत्यै नमः ॥ श्री गुरुभ्यो नमः ॥

अविघ्नमस्तु ॥ शुभमस्तु ॥

ॐ ॥ प्रणम्य चरणाम्भोजयुगलं कमलापतेः ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ॥ १ ॥

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितं तथापि गंभीरया वाचा विक्षिप्य वर्णितं न मन्दैः सुखेन शक्यते बोद्धुमिति तदर्थमिदमारभ्यते । यो धर्मो लक्ष्ये व्याप्त्या वर्तते न वर्तते चान्यत्र स लक्षणमित्युच्यते ।

यथा गोः सास्नादिमत्त्वम् । तद्धि गोषु सर्वत्रास्ति । नास्ति चागोषु ॥ अन्यथाभूतं त्वलक्षणम् ॥

End:

अप्रामाण्यजनने तु दोषवशादन्या शक्तिराविर्भवति । ज्ञप्तिस्तु परत एव । इन्द्रियादिस्वरूपस्य यथायथं स्वप्रमाणवेद्यत्वात् । यथार्थज्ञानसाधनत्वस्यानुमानवेद्यत्वादिति । तदेवंभूतैः प्रमाणैः पदार्थानां नित्यानित्यत्वादिकं विनिश्चित्य विषयेषु विरक्तस्य शमादिसंपत्तिमतो वासुदेवैकशरणस्य तद्विषया तद्विषयाणि श्रवणमनननिदिध्यासनान्यादरनैरन्तर्याद्बहुकालमनुष्ठितवतो भगवत्साक्षात्कारे सत्युद्रिक्तया तद्भक्त्या भगवत्प्रसादादशेषानिष्टनिवृत्तिविशिष्टानन्दादिस्वरूपाविर्भावलक्षणमुक्तिर्भवतीति ।

Colophon:

जयतीर्थमुनीन्द्रेण बालबोधाय निर्मिता ।
प्रमाणपद्धतिर्भूयात्प्रीत्यै माधवमध्वयोः ॥

इति श्रीजयतीर्थमुनीन्द्रविरचिता प्रमाणपद्धतिः समाप्ता ॥

Subject: Pramāṇapaddhati.

Remarks:—The Ms. is in good condition.

According to the introductory sentences of the author this seems to be a work in easy style expounding the Mādhva doctrines establishing them logically. Though many works of this author are printed this work has not been printed so far.

PRAMĀṆAPADDHATIḤ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8112	B. L.	6038	Paper.	$9\frac{3}{4} \times 4\frac{1}{2}$	70	7	Devanāgarī.	Complete.
8113	,,	6039	,,	$9 \times 4\frac{3}{8}$	25	13-15	,,	,,
8114	,,	6040	,,	$9\frac{1}{2} \times 4\frac{3}{8}$	27	11-17	,,	,,
8115	,,	6041	,,	$9\frac{1}{4} \times 5\frac{7}{8}$	28	9	,,	,,
8116	,,	6042	,,	$9\frac{1}{2} \times 6$	21	16 or 17	,,	,,
8117	,,	6043	,,	$12\frac{1}{2} \times 5$	26	10	,,	,,

DETAILED REMARKS on the MSS. IN THE ABOVE TABLE.

8113 Colophon :—

इति + तृतीयं प्रकरणं समाप्तम् ॥ जयतीर्थ + माधवमध्वयोः ॥ रुधिरोद्गारिफाल्गुनसौम्यवासरे ऊत्तूरु नारायणेन लिखितमिदं पुस्तकम् ॥ अस्मत्परमगुरुः श्रीमदानन्दतीर्थः प्रीतोऽस्तु ॥

8114 Colophon :—

इति + तृतीयं प्रकरणम् । तारणसंवत्सरेमार्गशीर्षमासे नवम्यां कौलगीनारायणेन लिखितम् स्वार्थं परार्थञ्च ॥

॥ प्रमाणपद्धतिटीका—पद्धतिप्रकाशिका ॥

8118. PRAMĀṆAPADDHATIṬĪKĀ—PADDHATIPRAKĀŚIKĀ.

Burnell's Catalogue No. 6044. Page 107. Right column.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—9. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—562. Author—Anantabhaṭṭa. Complete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

नारायणं ब्रह्मशिवेन्द्रपूर्वैर्वन्द्यं सुरेशैर्विभुमप्रमेयम् ।
शुभैरसङ्ख्येयगुणैश्च पूर्ण..................नुं नमामि ॥

व्यासं मुनीन्द्रं जगदेकनाथं सर्वे... मचिन्त्यशक्तिम् ।
...दिभिश्चिन्तित..................नदमानतोऽस्मि ॥

शिवादिभिर्वेदवरैः समस्तैर्वन्द्यं सदा श्रीहरिपादभक्तम् ।
आनन्दतीर्थं प्रणमामि लोकः.. ......यदनुग्रहेण ॥

दैत्यैः खलैर्यो मणिमत्पुरोगैस्तिरोहितज्ञानमार्गो बभूव ।
श्रीशाज्ञया ज्ञानमार्गश्च वृत्त्यै मध्वं...प्रणतोऽस्मि तं प्रभुम् ॥

श्रीपद्मनाभार्यमुखान्यतीन्द्रान्वि...रूयतीर्थांश्च नमामि माध्वान् ।
त्रिविक्रमार्यप्रमुखान् गृहस्थान्मध्वीयशास्त्रार्थविचारदक्षान् ॥

येषां मुखाम्भोजविनिःसृताया भवन्ति तृप्ता अनिशं सुधायाः ।
जना हि मध्वीयसुशास्त्रदीपाञ्श्रीमज्जयार्यान् प्रणमामि मूर्ध्ना ॥

येऽप्याप...निर्मांश्च सर्वान्मध्वीयसिद्धान्तयथा........ ।
....यतिकुयुक्तिकुम्भविहारकान्नौमि नृसिंहवर्यान् ॥

येषां प्रसादात्सुजनाः समस्ताः मध्वीयशास्त्र.. वदन्ति भक्त्या ।
तेषां गुरूणां शुभपादपद्मरजो मनोज्ञं शिरसा वहामि ॥

श्रीमद्गुरूणां करुणाबलेन मध्वीयसन्मार्गसुमार्गदीपः ।
प्रीत्यै हरेर्मध्वदेवस्य मायागुरोः (?) करिष्यामि यथावबोधम् ॥

अथ श्रीमज्जयतीर्थाचार्याः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये प्रचयगमनाय च शिष्टाचारपरंपराप्राप्तं विशिष्टेष्टदेवतानतिरूपं मंगलं मनसि कृतं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन्त एव प्रेक्षावत्प्रवृत्त्यर्थं चिकीर्षितं प्रतिजानते । प्रणम्येति । प्रकर्षेणोरसा शिरसा स्मृत्युक्तप्रकारेण भक्तिश्रद्धापूर्वकं नमस्कृत्येत्यर्थः । यद्वा रमाद्यपेक्षया भक्त्यतिशयेनेत्यर्थः । अनेन मनसि कृतं रमावन्दनमपि ग्रन्थतः कृतं भवति । चरणेति ॥

End:

एवं समापितप्रकरणः श्रीमज्जयतीर्थमुनिः स्वकृतप्रकरणमिष्टदेवतायां गुरावर्पयति । जयतीर्थेति ।

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
व्याकृतः पद्धतौ शब्दपरिच्छेदो यथामति ॥

विष्णुं श्रीवल्लभं लक्ष्मीं मध्वदेवञ्च मारुतिम् ।
शि....द्धि....श्रताब्धिप्राज्ञमार्यान्नौमि मे गुरून् ॥

येऽध्यापयित्वा निगमं माध्वसिद्धान्तमाविशन् ।

तेषां नृसिंहवर्याणां गुरूणां पादयोर्भजे ॥

Colophon:

इति श्रीमज्जयतीर्थमुनिविरचितप्रमाणपद्धतिटीकायां पद्धतिप्रकाशिकायां निखिलविद्वच्चूडामणिवन्दितचरणारविन्दानां सूनुना अनन्ताख्येन कृतायामागमपरिच्छेदः समाप्तः ॥

श्री कृष्णार्पणमस्तु ॥ कौलगीनारायणेन लिखितम् ॥

Subject: Pramāṇapaddhati Prakāśikā 1-3 Paricchedas, a commentary on Jayatīrtha's Pramāṇapaddhati.

Remarks:—The Ms. is in good condition.

॥ प्रमाणपद्धतिव्याख्या ॥

8119. PRAMĀṆAPADDHATIVYĀKHYĀ.

Burnell's Catalogue No. 6045 Page 10. Right column. Substance—Paper. Size—12⅝ × 3⅞ inches. Sheets—50. (1, 4, 5, 14—51, 54 & 55, & 63 are missing.) Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2340. Author—Viṭṭalabhaṭṭa. Incomplete. Not printed.

Beginning:

...योरिव व्रीहियवयोर्विकल्पोच्छेदप्रसङ्गात् । अन्यथा तत्रापि विकल्पप्रसङ्गात् । ननु तथापि व्यतिरेकव्यभिचाराभ्न तस्य प्रारिप्सितप्रकरणपरिसमाप्तिहेतुतेति चेन्न । एकजातीयशक्तिमत्त्वेन हेतुत्वाङ्गीकारेण व्यभिचारात् ।

End:

नन्वस्तु युक्तरीत्येदं प्रकरणं सफलं तथापि परोपदेशा-
त्मकस्यास्य प्रकरणस्य परार्थत्वेन स्वार्थत्वाभावात्स्वस्येदं
प्रकरणं व्यर्थमिति शङ्कावारणाय स्वकृतेनानेन प्रकरणेन
स्वस्य ....रूपप्रयोजनं प्रार्थ्यते जयतीर्थमुनीन्द्रेणेति ।
बालबोधाय बालानामल्पमतीनां बोधाय प्रमाणादिस्वरू-
पनिर्णयायेत्यर्थ इति ।

Colophon:

प्रमाणपद्धतेर्व्याख्या बालबोधाय निर्मिता ।
विठ्ठलेन तथा भूयात्प्रीत्यै माधवमध्वयोः ॥
वाणिबालनृसिंहभट्टसूनुना विठ्ठलेन विरचिता प्रमाणपद्धतिव्याख्या
समाप्ता ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु । ग्रन्थसंख्या ४००० ॥

Subject: Pramāṇapaddhativyākhyā, another commentary on Jayatīrtha's Pramāṇapaddhati.

Remarks:—The Ms. is in a decaying condition.
This Ms. wants beginning.

॥ प्रमाणपद्धतिव्याख्या—अभिनवामृतम् ॥

8120. PRAMĀṆAPADDHATIVYĀKHYĀ—ABHINAVĀMṚTAM.

Burnell's Catalogue No. 6059. Page 107. Right column.
Substance—Paper. Size—$18\frac{1}{2}\times5\frac{1}{8}$ inches. Sheets—44.
Lines—11 to a Page. Script—Devanāgarī. No. of

Granthas—1754. Author—Satyanāthayati. Incomplete. Not Printed.

Beginning:

श्री रामचन्द्राय नमः ॥

नमामि श्रीमदानन्दतीर्थपूजितविग्रहम् ।
रामचन्द्रं निजानन्दसान्द्रमिष्टतमं गुरोः ॥ १ ॥

अपारिजातो यः ख्यातो द्वेषदोषविवर्जनात् ।
इष्टदानात्पारिजातं वन्दे सत्यनिधिं मुदे ॥ २ ॥

प्रमाणपद्धतौ बुद्धिसञ्चारभ्रमशान्तये ।
सत्यनाथयतिः सेव्यमारभेऽभिनवामृतम् ॥ ३ ॥

शिष्यशिक्षार्थं स्वग्रन्थस्येष्टदेवतानतिपूर्वकत्वं दर्शयन् चिकीर्षितं प्रतिजानीते । प्रणम्येति ॥

End:

प्रातः पूर्वकालीनगजाभावज्ञानस्य विवक्षितत्वात् । प्राक् यदुक्तमभावस्य प्रत्यक्षवेद्यत्वं तदाक्षिपति । अभावस्येति । बहुलज्ञान इति । अल्पज्ञानकारणं बहुलज्ञानसंभवप्रमाणमित्यर्थः । नन्वल्पज्ञानसाधनं बहुलज्ञानमिति कथं विरोधादित्याक्षिपति ॥ यथेति । यथा ॥ कथं न । कथमपि । ततश्चा .... ॥

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथयतिविरचिते प्रमाणपद्धतिव्याख्यानाभिनवामृते प्रत्यक्षपरिच्छेदः समाप्तः ॥

Subject: Pramāṇapaddhativyākhyā otherwise known as Abhinavāmṛta, a third commentary on Jayatīrtha's Pramāṇapaddhati.

Remarks:– The Ms. is in a decaying condition.

॥ प्रमाणसङ्ग्रहः ॥

8121. PRAMĀṆASAṄGRAHAḤ.

Burnell's Catalogue No. 6107. Page 116. Left column. Substance—Paper. Size—9⅞ × 4¼ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—320 Author—? Complete. Printed.

Beginning:

श्री गुरुभ्यो नमः ॥

नारायणस्सदोद्रिक्तसुखज्ञानबलैः शुभैः ।
यशोलावण्यगैर्यैश्च जयति श्रीरमापतिः ॥

अनन्तानन्तसूर्याश्च महादीधितयः सदा ।
यत्तेजोंशसमानस्युः स मे वन्द्यः परो हरिः ॥

End:

पूर्णानन्दमहोदधिः परतमो नित्यः परस्मात्सदा
सर्वज्ञः सकलेशिता गुणनिधिः नित्योत्सवस्तद्विदाम् ।
सर्वस्मादधिकः प्रियः प्रियतमः खिष्टादपीष्टोत्तमः
सर्वस्माच्च हितात्सदा हिततमः प्रीतो भवेन्मे हरिः ॥

नमो नमो शेषविशेषपूर्णगुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादतिशुद्धसंविद्दात्रेऽनुपाधिप्रियसद्गुणात्मने ॥

Subject: Pramāṇasaṅgraha.

Remarks:—The Ms. is in good condition. The Ms. is a compilation of ślokas selected from several works to prove that God Viṣṇu is the Supreme Lord.

भेदाधिक्कारन्यक्कारः

8122. BHEDADHIKKĀRANYAKKĀRAḤ.

Burnell's Catalogue No. 6168. Page 110. Left column. Substance—Paper. Size—8 × 3⅛ inches Sheets—99. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—? Incomplete. Not printed.

Beginning:

श्री राजगोपालाय नमः ॥

शुक्लाम्बरधरं + विघ्नोपशान्तये ॥ १ ॥

यस्यद्विरदवक्त्रा + तमाश्रये ॥ २ ॥

श्रेयः परं दिशति यस्य कटाक्षलेशो
भास्वानिव प्रकटयत्यपि तत्त्वजातम् ।
तं कौशिकान्वयपयोनिधिपूर्णचन्द्रं
श्री श्रीनिवासगुरुमन्वहमाश्रयामः ॥ ३ ॥

विलसतु हृदये मे विश्वनिर्माणदक्षो
विविधशुभगुणाढ्यो विश्वरक्षैकदीक्षः ।
निमलहृदयलक्ष्मीवीक्षणीयास्यचन्द्रो
वरुणनिलयकन्यावल्लभो वाजिवक्त्रः ॥ ४ ॥

रामानुजार्यनिगमान्तगुरू भवेतां
प्रत्यर्थिपक्षदलनोद्यतवागुरीणौ ।
मान्यैः प्रसिद्धिविभवैः परजीवभेदैः
प्रत्यर्थिभङ्गकरणाय महागुरू नः ॥ ५ ॥

इह खलु भगवान्सर्वेश्वरो भवभयसंतप्तजीवलोकभागधेयकृपावशंवदस्तदुज्जीवनाय वेदान्प्रवर्त्य तत्र पूर्वभागेनाराधनस्वरूपाङ्गभूतं कर्मयोगमुपदिश्य उत्तरभागेन च ज्ञानयोगं तत एव पृथगात्मानमित्यादिना भेदोपासनं च शेषशेषिभावरूपसंबन्धगोचरमुपदिश्य एतदेव शुकशौनकपराशरपाराशर्यादयश्च विस्तारयामासुः ॥

ननु भेदे प्रमाणाभावान्न भगवतः दोषितेति चेत् अस्ति खल्वसदादिप्रत्यक्षं प्रमाणं नाहमीश्वर इति । न चास्य भ्रमत्वम् । जीवेश्वरैक्यग्राहकलोकप्रमाणाभावात् । तथा हि ।

End:

प्रतियोगिभिन्न इत्यादि बुद्धेरेव प्रमाणत्वात् अन्यथान्यत्रापि तत्त्वे किं मानम् । अत एवेत्याद्यप्यसंगतम् । स्वरूपभाने सति भासमानत्वा... भेदप्रतियोगित्वं न स्वरूपधर्मधर्मिभा... ॥

Subject : Bhedadhikkāranyakkāra, a work establishing the duality logically.

Remarks:—The Ms. is in a fairly good condition.

Nṛsimhāśrama wrote an Advaita work called Bhedadhikkāra criticising the Dvaita duality and this is a criticism of that work establishing the duality logically. The author's name is not known. He calls himself as the disciple of one Srinivāsayati. He mentions Rāmānuja and Vedāntadeśika also.

॥ भेदोज्जीवनम् ॥

8123. BHEDOJJĪVANAM.

Burnell's Catalogue No. 6175. Page 108. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—10. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—275. Author—Vyāsayati. Complete. Not printed.

Beginning :

स्वभावतः स्वतन्त्रत्वप्रमुखैर्निखिलैर्गुणैः ।
विभिन्नो विश्वतो विष्णुर्जयताज्जगदीश्वरः ॥

ननु कथं विष्ण्वाख्यस्य ब्रह्मणः स्वभावः ते... अचेतनात्मकविश्वभिन्नत्वम् । भेदे प्रमाणाभावात् । तथा हि ॥

End :

तर्कपराहतिः सोपाधिकत्वाभाससमानयोगक्षेमत्वादीनि साधारणदूषणानि । अद्वैतश्रुतयस्तु भगवत्पादैरन्यत्र व्याख्याता इति ॥

Colophon :

इति ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना कृतं भे-

दोज्जीवनं समाप्तम् ॥

शुभमस्तु ॥ श्रीसत्यविजयगुरुराजो विजयतेतराम् ॥

Subject: Bhedojjīvana, a short treatise establishing the duality.

Remarks:—The Ms. is in good condition.

This work is by the great Vyāsatīrtha disciple of Brahmaṇya Tīrtha and is the same as the author of Nyāyāmṛta and Tarkatāṇḍava. He also wrote a Super-commentary on Ānandatīrtha's Brahmasūtrabhāṣya and ṭīkas on Ānadatīrtha's Upaniṣadbhāṣyas. Many of his other works are published but this work has not been published. For more remarks see notes under No. 8102.

भेदोज्जीवनटिप्पणम् ॥

8124. BHEDOJJĪVANAṬIPPAṆAM.

Burnell's Catalogue No. 6778 Page 108. Left column. Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—28. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—? Incomplete. Not printed.

Beginning:

श्री वेङ्कटेशाय नमः ॥

भगवान् व्यासतीर्थमुनिः विष्णोश्चेतनादचेतनात् भेदप्रतिपादकं भेदोज्जीवनाख्यं प्रकरणं करिष्यन् वक्ष्यमाणग्रन्थसंगत्युपयोगि विशेषणवत्वेन विष्णुं स्तुवन्त आशास्ते

स्वभावत इत्यादिना जगदीश्वरः जयतात् उत्कृष्टो वर्तते ॥

End:

स्वस्वानुव्यवसायसाक्षिकाजात ....

आकारान्तराणा..... ॥

Subject: Bhedojjīvanaṭippaṇam.

Remarks:—The Ms. is in a good condition. This is a commentary by an unknown author on Vyāsatīrtha's Bhedojjīvana.

॥ मध्वमन्त्रार्थमञ्जरी ॥

8125. MADHVAMANTRĀRTHAMAÑJARĪ.

Burnell's Catalogue No. 6182. Page 103. Right column. Substance—Paper. Size—13⅜×5 inches. Sheets—68. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2350. Author—Nārāyaṇa. Complete. Not Printed.

Beginning:

श्री गुरुभ्यो नमः ॥

॥ हरिः ॐ ॥

श्रीमन्महाभारततात्पर्यनिर्णयस्य द्वात्रिंशतितमेऽध्याये ॥

चतुःसहस्रे त्रिशतोत्तरे गते संवत्सराणां तु कलौ पृथिव्याम् ।
जातः पुनर्विप्रतनुः स भीमो दैत्यैर्निगूढं हरितत्त्वमाह ॥

तदैव कृष्णापि भुवि प्रजाता प्रीत्यै हरेरंभ्तमस्यपालयत् ।
महासुरान् विष्णुपराजुनाद्याः कलौ प्रजाता हरितोषणाय ॥

पुनश्च तस्यां समवाप्य सर्वे स्वयं परां तेपि विमुक्तिमापुः ।
वायुस्त्वमातस्स हनूमदंशो ब्राह्मं पदं प्राप्य वृकोदरश्च ॥
वामौ....रत्वं गत एव कृष्णया सहैव मुक्तिं गमिताखिलोत्तमाम् ।
भुवि द्युलोके च विरिञ्चतायां मुक्तौ च ताभ्यामधिकं समस्तात् ॥
संतोष्यते पूर्णगणै रमेशः सदैव नित्योदितसद्गतिभ्याम् ।

End:

तेष्वपि सर्वाधिकारिणां ज्ञानादिदानेनाभिवृद्धिं मुख्य
प्राणरूपा मरुतः ते यूयं नः अस्मान् स्वस्तिभिः परमगु-
ह्यप्रदानेन सदा पात पालयतेत्यर्थः ।

Colophon:

इति नारायणेनेह श्रुतिपूजार्थमुद्धृता ।
श्रुतिकल्पतरोर्भूयान्माध्वमन्त्रार्थमञ्जरी ॥

Subject: Madhvamantrārthamañjarī.

Remarks :—The Ms. is in good condition.

This seems to be a rare work this library contains. The author does not give any more details about himself than his name It is doubtful if this Nārāyaṇa is the same as the great Mādhva poet the author of Madhvavijaya and other works.

॥ योगदीपिका ॥

8126. YOGADĪPIKĀ.

Burnell's Catalogue 6108. Page 110. Left column.

Subatnce—Paper. Size—9⅞ × 4½ inches. Sheets—25. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—670. Author—Trivikramācārya Śiṣya. Complete. Not printed.

Beginning,

हरिः ॐ ॥

विष्णुं श्रीवल्लभं नत्वा मध्वञ्च प्राणनायकम् ।
गुरूंस्त्रिविक्रमाचार्यान् क्रियते योगदीपिका ॥
विहितैः कर्मभिः पुंसो निषिद्धानि न कुर्वतः ।
परमाराधनं भक्त्या योगः कर्मसु कौशलम् ॥

End.

असव्यकोणे दोषेण तन्मन्त्रे बलिनावहेत् ।
अथ प्रदक्षिणीकृत्य नमस्कृत्यार्पयेत्सुधीः ॥
द्वाःस्थाभ्यनुज्ञया घण्टामुद्घोष्यान्त(ःप्रविश्यच)
निवेद्यमुन्मोच्य यथोदितमर्चां समापयेत् ॥

Colophon:

इति योगदीपिकायां नवमः पटलः ॥

श्रीकृष्णार्पणमस्तु ॥

Subject: Yogadīpikā 1-9 Paṭalas an explanation of the word Yoga in Vedāntaśāstra.

Remarks:—The Ms. is in good condition.

॥ विष्णुभक्तिचन्द्रोदयः ॥

8127. VIṢṆUBHAKTICANDRODAYAḤ.

Burnell's Catalogue No. 6117. Page 109. Right column.
Substance—Paper. Size—10¼ × 4¼ inches. Sheets—106. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Nṛsiṃhāraṇya. Incomplete. Not printed.

Beginning,

श्रीगणेशाय नमः ।

ॐ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय ।

गुरुभ्यो नमः । सरस्वत्यै नमः ।

ॐ नमो भगवते श्रीमद्दिव्यलक्ष्मीनृसिंहाय ।

वन्देहं तं नृसिंहेशं पुण्याख्यं गुरुमव्ययम् ।
श्रीराममन्त्रराजं च वैष्णवानां हि सिद्धये ॥

End,

चन्द्रं मांसं सुरातैलं व्यायामं क्रोधमैथुनम् ।
पराक्कांस्यताम्बूलं लोभं निर्माल्यलंघनम् ।

द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ।
सायमाद्यन्तयोरह्नोः सायंप्रातः सुमध्यमे ॥

उपवासपरिप्रेप्सुर्जह्याद्भुक्तिचतुष्टयम् । इति ।

Colophon:

इति श्रीनरसिंहारण्यमुनिविरचिते विष्णुभक्तिचन्द्रोदये एकादशकलाप्रकरणम् ।

Subject: Viṣṇubhakticandrodaya 1-11 Kalas or Prakaraṇas.

Remarks:—The Ms. is in a good condition. This Ms. abruptly breaks off at the close of the 11th Prakaraṇa

॥ वादावलिः ॥

8128. VĀDĀVALIḤ.

Burnell's Catalogue No. 6104 Page 110. Left column. Substance—Paper. Size—$8\frac{1}{2} \times 3$ inches. Sheets—18. Lines—8 to 11 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Jaya Tīrtha. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः

नमोऽगणितकल्याणगुणपूर्णाय विष्णवे ।
सत्यशेषाजगज्जन्मपूर्वकर्त्रे सुरद्विषे ॥

ननु कथं सत्यता जगतोऽङ्गीकाराधिकारिणी । विमतं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वात् शुक्तिरजतवदित्यनुमानादिति चेत् । मैवम् ॥

End:

न च सिद्धसाधनतापरिहारार्थविशेषणमिति वाच्यम् । एतत्परात्यन्ताभावस्यास्माकमसिद्धेः । एतेन दृष्टान्तोऽपि साध्यविकलतया प्रत्युक्तो वेदितव्यः ॥

Subject: Vādāvali.

Remarks:—The Ms. is in good condition.

This work has been printed along withg Rāghavendra's commentary at Bombay in 1904.

॥ वादावलिः ॥

8129. VĀDĀVALIḤ.

Burnell's Catalogue No. 6105. Page 110. Left column. Substance—Paper. Size—10×4 inches. Sheets—16. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—372. Author—Jayatīrtha. Incomplete. Printed.

Beginning—Same as No. 8128

End:

असकृच्छ्रुतिस्तु परमेश्वरस्य पापादिसम्बन्धाभावा...

न द्वितीयः । कारणसामर्थ्येन विषयविषयिभावोपपत्तेः ॥

Subject: Vādāvali.

Remarks:—The Ms. is in good condition.

॥ वेदान्तप्रमेयविचारः ॥

8130. VEDĀNTAPRAMEYAVICĀRAḤ.

Burnell's Catalogue No. 6167. Page 110. Right column. Substance—Paper. Size—7½×4½ inches. Sheets—14. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—? Complete. Not printed.

Beginning:

श्री गुरुभ्यो नमः ॥

यान्येतानि दूषणानि त्रीण्यनधिगतार्थेत्यादिलक्षणवाक्यमधिकृत्योदवीभवाम तत्राद्यदूषणदुदूषयिषया यदेतदवोचन् तदिदं लक्षणलक्षणेऽसाधारणनिवेशो व्यर्थ इति दूषणसर्वस्वे पर्यवसितं प्रमाणलक्षणविचारे नातीव संतामनयुक्तश्च(?)व्यावृत्तेरन्यथोपपादनेऽपि व्यवहाररूपप्रयोजनस्य जागरूकत्वादिति ॥ तच्चिन्तयामः ॥

End:

अयं वृक्षः कपिसंयोगवानित्यादिप्रत्यक्षाणां वृक्षांश एव कालसंबन्धावगाहितया संयोगाद्यंशेन तदनवगाहितया तदंशे जन्मान्त...भूतत्वप्रयुक्ताव्याप्तेः कालवैशिष्ट्यमादायापरिहाराच्चेति दिक् ॥

Subject: Vedântaprameyavicâra.

Remarks:—The Ms. is in a good condion. The author is not known.

॥ सत्तत्त्वरत्नमाला—सव्याख्या ॥

8131. SATTATTVARATNAMĀLĀ—SAVYĀKHYĀ.

Burnell's Catalogue No. 6110. Page 110. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—89. Lines—12 to 18 to a Page. Script—Devanāgarī. No. of Granthas—2860. Author—Ānandatīrtha son of Viṭṭhala. Incomplete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थार्यहृदयाम्बुजवासिने ।
नमः श्रीपतये नित्यगुणपूर्णाय विष्णवे ॥

सर्वगीर्वाणसंसेव्यदिव्यपादसरोरुहान् ।
श्रीमदानन्दतीर्थार्यवर्यान्नित्यं नमाम्यहम् ॥

नत्वाथ गुरुवर्यान् पूर्वेषामेव प्रसादतः ।
सत्तत्त्वरत्नमालाख्यग्रन्थव्याख्यां करोम्यहम् ॥

ग्रन्थादौ शास्त्राध्यायोक्तगुणवत्तथा....स्तुवन्नमनरूपम-
ङ्गलमाचरति । नारायणामिति ॥ आत्मतन्त्रामिति गुण-
पूर्णतामुपपादनार्थम् ॥

End:

प्रभुः प्राणेन महतामीशेन रमया तथा ।
वेदात्मिकया च सहितः सूक्ष्मः सन्मनसि स्थितः ॥

रुद्रादीनान्तु सर्वेषां मन्त्रवर्णस्वरेषु च ।
सर्वेषां प्रेरको वायुर्ज्ञानानन्दबलैस्त्रिवृत् ॥

नित्यशक्तिः सर्वगः सन् बहुधैव प्रतीयते
तस्मिन्नोतमिदं सर्वं पटलक्षणतन्तुवत् ॥

स एव वायुरुद्दिष्टो वायुर्हि ब्रह्मतामगात् ॥

Subject: Sattattvaratnamālāvyākhyā.

Remarks:—The Ms. is in good condition.

Sattattvaratnamālā is a metrical work on dualistic philosophy written by Ānandatīrtha son of Viṭṭhala. This is a commentary on that work. A commentary called Prakāśa was printed along with the text at Bombay in 1918. But it is not known if this is that commentary.

॥ विद्वन्मोदतरङ्गिणी ॥

8132. VIDVANMODATARAṄGIṆĪ.

Burnell's Catalogue No. 12288. Page 96. Left column. Substance—Paper. Size—10 × 4¼ inches. Sheets—40 (out of 1-43). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—770. Author—Cirañjīvibhaṭṭācārya. Incomplete; wants end. Not printed.

Beginning:

श्री गणेशाय नमः ॥

तमोगुणविनाशिनी सकलकालमुद्योतिनी
धरातलविहारिणी जडसमाजविद्वेषिणी ।
कलानिधिसहायिनी लसदलोलसौदामिनी
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥ १ ॥

दक्षो दक्षोपमेयः समजनि जनितारंभसंभावनीयो
रक्षोविक्षोभभीतः प्रथितजनपदो रक्षितो येन गौडः ।
यस्याशीर्वाददूर्वादलकलितशिखो भूपतेर्यज्ञयूपः
संज्ञातोऽनेकशाखस्फुटमिव निगमो व्यासतो व्यासमाप्तः ॥

क्रियादक्षस्य दक्षस्य राढापुरनिवासिनः ।
सौजन्यजनिताकीर्तिर्गौडदेशमपूरयत् ॥ ३ ॥

तस्य काश्यपगोत्रस्य कश्यपस्येव सन्ततिः ।
प्रचुरा गौडदेशीयकुलीनाग्रेसराभवत् ॥ ४ ॥

ब्राह्मण्याचारधाराचरणरसनशोहंसरूपोऽस्य वंशे
काशीनाथोऽष्टमोऽस्मात्समजनि विनतो गोमुचब्राह्मणेषु ।
येनानीय प्रयत्नाद्विजचरणरजो मूर्ध्नि विन्यस्तमात्तं
पुत्रादेरत्र सिद्धौषधमिव सहसानेकरोगाञ्जहार ॥ ५ ॥

सामुद्रके सोऽथ समुद्रकल्पः
सामुद्रकाचार्य इति प्रसिद्धिम् ।
लेभे नृणामाकृतिदर्शनेन
फलं वदन् भूतभविष्यदादि ॥ ६ ॥

अथ तस्य त्रयः पुत्राः जाता पितृपरायणाः ।
राजेन्द्रो राघवेन्द्रश्च महेशश्चेति ते क्रमात् ॥ ७ ॥

तेषामेष गुणोत्तरस्समजनि श्रीराघवेन्द्रः कृती
बाल्येऽमुं समुदीक्ष्य लक्षणयुतं तातोऽनुरक्तोऽभवत् ।
लेभे षोडशवार्षिकः कृतिमतामानन्दवृन्दाङ्कुरो
भट्टाचार्यशतावधानपदवीं यस्तीर्णविद्यार्णवः ॥ ८ ॥

बाल्येऽधीत्य समस्तशास्त्रमभितः सिद्धान्तवागीशतो
वागीशप्रतिमो बभूव विजयी वादेषु विद्यावताम् ।
यस्यास्वाद्य सरस्वतीरससुधाधारैकसारा गिरो
मूर्धान्दोलनशालिनो हि कवयो गायन्ति नित्यं यशः ॥ ९ ॥

एकैकमेकैककविप्रयुक्तं
श्लोकस्थितं वर्णमयव्यवस्थम् ।
आकर्ण्य तत्संख्यमथ प्रयुङ्क्ते
स्वयं कृतश्लोकगतश्च वर्णम् ॥ १० ॥

रीत्यानया श्लोकशतीं कवीनां
शतस्य निर्वक्त्यवधारयित्वा ।
समस्यया पूर्तिमतीमथैतां
स्वयं कृतश्लोकशतीं तथैव ॥ ११ ॥

अतोऽभिधानेन शतावधानो
बभूव लोके विदितप्रभावः ।
अनन्यसाधारणशक्तिशाली
संख्यावतां संसदि माननीयः ॥ १२ ॥

श्रुत्यर्थसार्थानवधानहेतो-
र्महान्धकारे पततां चिराय ।
सञ्चारहेतोर्विविधक्रियायै
मन्त्रार्थदीपं कृतवान् कृती यः ॥ १३ ॥

नानाव्यवस्थाप्रभवन्तमन्त-
र्विद्वद्विचारोच्छलदुत्तरङ्गम् ।
यः कालतत्त्वार्णवमुत्तरीतुं
रामप्रकाशं निबबन्ध सेतुम् ॥ १४ ॥

यस्य च कविद्वयकृतमेतच्छ्लोकद्वयम् ।

अर्हं हरिहरः सिद्धेरविलम्बसरस्वतिः ।
साक्षाच्छतावधानस्त्वमवतीर्णा सरस्वती ॥ १५ ॥

पुंरूपधारिणी साक्षादवतीर्णा सरस्वती ।
जितश्शतावधानोतो(?) विष्णुनापि न जिष्णुना ॥ १६ ॥

तस्मादहं समुत्पन्नो महापुरुषतः पुमान् ।
धामैकनिधितः सूर्यात्किरणैककणो यथा ॥ १७ ॥

नाम्नैव सम्बोध्य जनः कथायां
  यदेतमाकारयिता तदाशीः ।
ताताग्रजो मामिति वत्सलत्वात्
  चिरं चिरञ्जीवतया जुहाव ॥ १८ ॥

सोहं पुरस्समधिगत्य पितुः प्रसादं
  ब्रह्मैक्यतां गतवतो शिवराजधान्याम् ।
यत्नादधीतमनधीतमथापि शास्त्र-
  मध्यापयामि निभृतं निपुणं विचार्य ॥ १९ ॥

न्यायादिशास्त्रेषु मया कृता ये
  काव्येषु ये वा रुचिराः प्रबन्धाः ।
भवन्ति विद्यासु च यासु यासु
  ये ये बुधास्तत्परितोषकास्ते ॥ २० ॥

सम्प्रत्यसौ सर्वमहीश्वराणा-
  मपण्डितानामपि सन्मतीनाम् ।
विज्ञानहेतोरथ पण्डितानां
  विरच्यते कोऽपि मया प्रबन्धः ॥ २१ ॥

पुनः पुनः पण्डितमण्डलीनां
याचे यथा भूरपि मण्डितोऽयं ।
मात्सर्यमुत्सृज्य कृतिं ममैतां
सर्वे भवन्तोऽपि विलोकयन्तु ॥ २२ ॥

जाने कदाचिदपि नैव शिवस्वरूपात्
तातात्परं परमदैवतमन्यदत्र ।
तस्मादिमां कृतिमिहाद्य तरङ्गिणीत्वे
(आ)धाय तच्चरणयोः परिकल्पयामि ॥ २३ ॥

End:

अथ शैवः सकोपं ॥

अहो भवानेव शिवं महेशं
वदन्वदत्य(न्य)मनेन सेव्यम् ।
व्याघातपातो वदतस्तवाय-
मापाततो दूषणमाह सम्यक् ॥ ५९ ॥

किञ्च पश्य ॥

ईशो महेशः परमेश्वरो वा
महेश्वरः केवलमीश्वरो वा ।
समाख्यया कः कथितो महाद्भिः
शिवादृते वेदपुराणविद्भिः ॥ ६० ॥

वैष्णवः सस्मितम् ॥ किमहो ईश्वर इति नाम्नैवैश्वर्य-मायाति । पश्य तावद्भगवतो विष्णोश्शिवस्य च तार-तम्यमैश्वर्यस्य ॥

तथा हि ॥

बिरिञ्चिलोकादपि योजनाना-
मष्टद्वयीकोटिसमुच्छ्रितो यः ।
विस्तारमात्रोरह संख्यकोट्या
सहस्रासूर्यैर्दशभिः समो यः ॥ ६१ ॥

* * *

यथोचितं सेवनतत्परा वा ।
विनापि सेवामपि संस्थिता वा ।
सदा समीपास्थितलब्धमाना
ये पार्षदा............ ॥(६९ ॥)


Colophon: (Sheet 87)

इति चिरञ्जीवभट्टाचार्यकृत विद्वन्मोदतरङ्गिण्यां सप्तमस्तरङ्गः ॥

Subject: Vidvanmodataranginī. A treatise giving preference to the Dvaita school and refuting the theories of the other schools of philosophy.

Remarks—The Ms. is in a fairly good condition. This Ms. abruptly ends towards the close of the eighth taranga.

The work is not printed. The author appends a long introduction to the work wherein he gives many details about himself and his family, and that it belonged to the Northern India, that it was a very learned family and that he studied at Benares. The following geneology may be gleaned from the introduction. One Daksha is said to be the family ancestor. From Daksha the seventh decendant was one Kaśīnātha.



It is said that his father was a great astrologer and author of many works in that science. This author also calls himself as the author of some kāvyās and works on Nyāya.

॥ सनत्सुजातीयव्याख्या ॥

8133. SANATSUJĀTĪYAVYĀKHYĀ.

Burnell's Catalogue No. 1397. Page 184. Left column. Substance—Paper.. Size—16×7 inches. Sheets—20. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—1260. Author—Śrīnivāsa. Complete. Not Printed.

Beginning:

श्रीमदानन्दतीर्थभगवत्पादगुरुभ्यो नमः ॥

सनत्सुजातीयव्याख्या आरभ्यते ।

" अनुक्तं यदि ते किंचिद्वाचा यद्विद्यते(धुना) तन्मे शुश्रूषवे ब्रूहि... ॥" इत्यन्वयः । अत्र तात्पर्यम् । विदुरं,

' पप्रच्छ सोऽवदद्धर्मं पार्थानां राज्यदापनम् ।

ऐहिकस्य सुखस्यापि कारणं तदनिन्दितम् ॥ '

अन्यथा सर्वपुत्राणां नाशं धर्मातिलंघनम् ।

तत्र भावमकृत्वा तु ज्ञानादिच्छन्नघःक्षयम् ।

विष्णोः स्वरूपं पप्रच्छ सोऽस्मरच्च सनातनम् ।

*   *   *

सनत्कुमार यदिमं शृणोमि मृत्युर्नास्तीति तवोपदेशम् । तवोपदेशं मृत्युर्नास्तीति शिष्यान् प्रति उपदिष्टमिति विदुरो मे प्राहेति भावः ।

End :

अणोरणीयान् + निहितं विदुः ॥

*   *

असंगो ह्ययं पुरुष इति श्रुतेरर्थसूचनाय न मे यूयं न चाप्यहमित्याह –मम आत्मा देह एव स्थीयते । अत्रेति व्युत्पत्त्या स्थानं । आत्मैव जायते अस्मादिति जन्मपुष्करे हृदयकमले । निहितं सन्निहितं विदुः ।

अत्राध्यायपञ्चके केचन श्लोकाः प्रक्षिप्ताः । प्रायः कोशेष्वदर्शनात्ते न व्याख्याताः ।

Colophon.

इति श्रीमच्छतसहस्रसंहितायां वैयासिक्यां श्रीमद्भारते उद्योगपर्वणि सनत्सुजातव्याख्यायां भारतश्रीनिवासाचार्यविरचितायां अष्टचत्वारिंशोऽध्यायो नाम समाप्तः । श्रीलक्ष्मीनृसिंहार्पणमस्तु ।

सर्वजिन्माधवे शुक्ले षष्ठ्यामुडुवासरे यामे द्वितीयके लेख्यं समाप्तम् ।

Subject. Sanatsujātīyavyākhyā.

Remarks:—The Ms. is in a fairly good condition. This Ms. gives the Sanatsujātīya in 5 chapters and the author says that some verses have not been commented upon, since they have been interpolated. This is the dualistic interpretation of Sanatsujātīya just like Saṅkarācārya's Sanatsujātīyabhāṣya. This Srīnivāsa has to be distinguished from the author of the same name who wrote a commentary on Nyāyāmṛta called Prakāśa.

॥ गजपञ्चाननः ॥

8134. GAJAPAÑCĀNANAḤ.

Not noticed by Burnell Ms. No. 14801 b.

Substance—Paper. Size—10 × 3⅞ inches. Sheets—3. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—55. Author—Timmaṇṇācārya. Complete. Not printed.

Beginning:

श्री गुरुराजः प्रसन्नः ।

शेषाद्रिरमणं नत्वा केशवार्यं जगद्गुरुम् ।

गजपञ्चाननं कुर्वे ज्ञानिनां प्रीतिदं सदा ॥

End:

व्याख्यातॄणां गुरुभक्ताग्रेसराणां स्वरूपप्रकटने पर्यव-

स्यतीति संक्षेपः ॥

Colophon:

इति श्रीपदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्यविजयश्रीचरणानां निजशिष्येण वरखेडितिम्मणेन विरचिते गजपञ्चानने प्रथमं प्रकरणं समाप्तम् ॥

Subject: Gajapañcānana, a work refuting all other systems of Philosophy establishing the dualism of Madhva.

Remarks:—The Ms. is in good condition.

The other work contained herein is:

जयन्तीनिर्णयः

For remarks see under No.7752.

॥ गजपञ्चाननः ॥

8135. GAJAPAÑCĀNANAḤ.

Burnell's Catalogue No. 6185. Page 109. Right column. Substance—Paper. Size—10 × 8⅞ inches. Sheets—6. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—Timmaṇṇa. Complete. Not printed.

Beginning, end, colophon and subject—Same as No 8134.

Remarks:—The Ms. is in good condition.

॥ सुधानादरणीयखण्डनम् ॥

8136. SUDHĀNĀDARAṆĪYAKHAṆḌANAM.

Not noticed by Burnell Ms. No. 14818.

Substance—Paper. Size—10 × 3⅞ **inches**. Sheets—8. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Timmaṇṇācārya. Complete. Not Printed.

Beginning:

श्री गुरुराजः प्रसन्नः ॥

शेषाद्रिरमणं नत्वा जयार्यञ्च जगद्गुरुम् ।

सुधानादरणीयानां विनोदं प्रारभे ततः ॥

उषा स्वाहा च पर्जन्यो मित्रोऽग्निर्वरुणो विभुः ।
प्रवाहोऽनिरुद्ध इन्द्रो रुद्रो वाणी च मारुतः ॥

उत्तरोत्तरतस्त्वेते गुणैः सर्वैश्च मुक्तिगा ।
इत्यत्र देवतातारतम्यकथनावसरे श्रीमन्न्यायसुधाया अधिकसङ्ख्यावशङ्कानिरासाय एतेषां समानन्तरावस्थितांश्चाह सूर्येत्यादिनोत्युक्तम् ।

End:

वस्तुतस्तु सुधानादरणीयानां मध्वशास्त्रानादरणीयत्वमेव तदर्थावगमस्य सुधाकारीयव्याख्यानत्वात् ये त्वन्यदीयग्रन्थाभावबोधादयः तेऽपि सुधादिमूला एव तत्र तत्र तैत्तरीयसंमतेरुक्तत्वात् । तस्माच्छुष्कतर्कमूलमायावादिकोलाहला एव बालव्यामोहनवचःकोलाहला उपेक्ष्या एवेति ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्यविजयतीर्थश्रीमच्चरणानां निजशिष्येण वरखेडितिम्मणेन विरचितं सुधानादरणीयखण्डनं समाप्तम् ॥

श्रीगुरुराजः प्रसन्नः ॥

Subject: Sudhānādaraṇīyakhaṇḍana.

Remarks:—The Ms. is in good condition.

॥ सुधानादरणीयखण्डनम् ॥

8137. SUDHĀNĀDARAṆĪYAKHAṆḌANAM.

Not noticed by Burnell Ms. No. 14819.

Substance—Paper. Size—10 × 3⅞ inches. Sheets—8. Lines—10-14 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Timmaṇṇācārya. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 8136.

Remarks:—The Ms. is in good condition After the colophon is given.

वरीवर्तु मयि श्रीमाञ्जरीहर्तु ममाहितम् ।
बरीभर्तु जयार्यो मां चरीकर्तु मनोरथम् ॥

॥ श्रीः ॥

॥ ग्रन्थमालिकास्तोत्रम् ॥

8138. GRANTHAMĀLIKĀSTOTRAM.

Burnell's Catalogue No. 6164. Page 107. Right column.

Substance—Paper. Size—6½ × 8⅜ inches. Sheets—2. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—Jayatīrtha. Complete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

कृष्णं विद्यापतिं नत्वा पूर्णबोधार्यसद्गुरून् ।
ग्रन्थान्मध्वश्चकारासौ सप्तत्रिंशदमन्दधीः ॥

गीताभाष्यं चकारासौ प्रथमं तुष्टिदं हरेः ।
भाष्यानुभाष्ये चक्रेऽथ अनुव्याख्यानमव्ययम् ॥

प्रमाणलक्षणं नाम कथालक्षणसंज्ञकम् ।
उपाधिखण्डनं चक्रे मायावादस्य खण्डनम् ॥ ३ ॥

चक्रे प्रपञ्चमिथ्यात्वमानखण्डनमप्यथ ।
चकार तत्त्वसंख्यानं साधनं विष्णुदर्शनम् ॥ ४ ॥

ग्रन्थं तत्त्वविवेकाख्यं तत्त्वोद्योतं हरेः प्रियम् ।
कर्मनिर्णयनामानं ग्रन्थं न्यायार्थबृंहितम् ॥ ५ ॥

सुखतीर्थयतिश्चक्रे विष्णुतीर्थविनिर्णयम् ।
ऋग्भाष्यञ्च चकारासौ सर्ववेदार्थनिर्णयम् ॥ ६ ॥

ऐतरेयं तैत्तिरीयं बृहदारण्यमेव च ।
ईशावास्यं काठकञ्च छान्दोग्याथर्वणं तथा ॥ ७ ॥

मण्डूकनाम षट्प्रश्नं तथा तलवकारकम् ।
चक्रे भाष्याणि दिव्यानि दशोपनिषदां गुरुः ॥ ८ ॥

निर्णयं सर्वशास्त्राणां गीतातात्पर्यसंज्ञिकम् ।
सन्न्यायविवृतिं चक्रे न्यायशास्त्रनिकृन्तनम् ॥ ९ ॥

नरसिंहनखस्तोत्रं चक्रे यमकभारतम् ।
द्वादशस्तोत्रमकरोत्कृष्णामृतमहार्णवम् ॥ १० ॥

तन्त्रसारं चकारासौ सदाचारस्मृतिं सुधीः ।
श्रीमद्भागवतस्यापि तात्पर्यं ज्ञानसाधनम् ॥ ११ ॥

महाभारततात्पर्यनिर्णयं संशयाच्छिदम् ।
यतिप्रणवकल्पञ्च प्रणवार्थप्रकाशकम् ॥ १२ ॥

जयन्तीनिर्णयं चक्रे देवकीगर्भजन्मनः ।
कृष्णस्य कृष्णभक्तो यद्वैपायनकराब्जतः ॥ १३ ॥

एतेषां पाठमात्रेण मध्वेशः प्रीयतां हरिः ॥ १४ ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पदाचार्यपूज्य......श्रीमज्जयतीर्थभि-
क्षुविरचितग्रन्थमालिका समाप्ता ।

Subject: Granthamālikāstotra, a list of works written by Ānandatīrtha. 1-14 Ślokas.

Remarks:—The Ms. is in good condition.

॥ ग्रन्थमालिकास्तोत्रम् ॥

8139. GRANTHAMĀLIKĀSTOTRAM.

Burnell's Catalogue No. 6165. Page 107. Right column. Substance—Paper. Size—6¾ × 2⅞ inches. Sheets—2 (1-2). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—Vyāsatīrtha? Jayatīrtha? Complete. Not Printed.

Beginning and end—Same as No. 8138.

Colophon:

इति श्रीव्यासतीर्थकृतौ ग्रन्थसंख्यास्तोत्रं संपूर्णम् ॥

Subject: Granthamālāstotra, otherwise known as Granthasaṅkhyāstotra 1-14 Ślokas.

Remarks:—The Ms. is in good condition. The othor work contained herein is:—

' दारिद्र्यनिवारणस्तोत्रम् '

At the end of this Ms. is found the following additional verse—

पान्त्वस्मासु विना वायो वायुस्तुतिजपं जपेत् ॥

व्यर्थं भवति तत्सर्वं प्राक्कृतं नरकं व्रजेत् ॥ १४ ॥

This Ms. mentions the names of author and work as different from those in the above number.

॥ जगत्सृष्टिक्रमः ॥

8140. JAGATSṚṢṬIKRAMAḤ.

Not noticed by Burnell Ms. No. 15577

Substance—Paper. Size—10×4 inches. Sheets—41 (7-50). Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—? Incomplete. Not Printed.

Beginning:

........ततो ब्रह्माण्डान्तर्गतलोकनियामकसर्वदेवताः ।

इतरेऽपि ज्ञानिनः ब्रह्माणं प्रविशन्ति तत्र केचिदुत्क्रान्ति-

योग्याः ज्ञानिनः प्रथममग्निलोकं गच्छन्ति ॥

End:

पुनश्च मारीचतयेव देवा

जाता अदित्यामसुराश्च दित्याम् ।

गावो मृगाः पक्ष्युरगादिसत्वा
दाक्षायणीष्वेव समस्तशोऽपि ॥

Subject : Jagatsṛṣṭikrama.

Remarks:—The Ms. is in good condition.

॥ सृष्टिविचारः ॥

8141. SṚṢṬIVICĀRAḤ.

Not noticed by Burnell Ms. No. 14804.

Substance—Paper. Size—9½ × 3⅞ inches. Sheets—6. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—? Incomplete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

"तदधिगम उत्तरपूर्वाघयो अश्लेषविनाशौ" इति
सूत्रदशि अपरोक्षज्ञानादिदंपूर्वपापके अश्लेषश्लेत्वथारे...

End:

सर्ववेदप्रतिपाद्यत्वाप्राप्तवागदे । अदु कूडदु । ऋते प्र-
सिद्धान् ब्रह्मैव स्तेनक्रमेण तु । इति ऋग्भाष्यादिदापूर्वप्र-
सिद्धवर्जशब्दवाच्यत्वा केलिदकारण... ॥

Subject: Sṛṣṭivicāra.

Remarks:—The Ms. is in good condition. Notes in Kanarese also are given herein.

॥ प्रमेयमणिमाला ॥

8142. PRAMEYAMAṆIMĀLĀ.

Not noticed by Burnell Ms. No. 14821.

Substance—Paper. Size—9¾×4 inches. Sheets—16. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—Mādhava. Complete. Not printed.

Beginning:

श्री गुरुभ्यो नमः ॥

श्री ब्रह्मवायुगिरिशेन्द्रसुरार्च्यसूर्य-
पूर्वैः सुरैः मुनिगणामरगायकाद्यैः ।
नानाविधैः परिकरैः परयैव भक्त्या
संपूज्यमानचरणं प्रणमामि कृष्णम् ॥

*　　*　　*

सर्वान् गुरून् पूर्वगुरूंन्नमामि मम सद्गुरून् ॥

रुक्मिणीवदनाम्भोजमध्वास्वादनतत्परम् ।
कृष्णं नत्वा सत्प्रमेयमणिमालां करोम्यहम् ॥ ४ ॥

महालक्ष्मीपतिः कृष्णः सर्वोत्कृष्टोऽखिलेश्वरः ।
चेतनाचेतनाशेषजगतोऽब्युत्तमोत्तमः ॥ ५ ॥

End:

जानन्ति ये सत्यमिति तेषां मुक्तिर्भवेद्ध्रुवम् ।
इह कृष्णः स्वयं प्रीणन् ददातीष्टान् मनोरथान् ॥

Colophon:

श्रीवेङ्कटनृसिंहार्यलोचनाभ्यां कृपावशात् ।
दीक्षितानां हि मर्त्यानामभीष्टानि भवन्ति हि ॥ ११४ ॥

तद्दयापात्रभूतानां कामितार्थः करे स्थितः ।
तच्छिष्येष्वन्त्यभूतेन माधवेन प्रकीर्तिता ॥ ११५ ॥

प्रमेयमणिमालेयं श्रीकृष्णाय मयाऽर्पिता ।
ध्रियतां हृदये सेयं स्वीकुरु कृपया मयि ॥ ११६ ॥

भैष्मीसत्यासमेतेन श्रीकृष्णेन तदात्मकः ।
विट्ठलोऽभीष्टदो भूयाद्गुरुहृत्पद्मसंस्थितः ॥ ११७ ॥

Subject: Prameyamaṇimālā, 1-115 Ślokas, a stotra on God Viṣṇu.

Remarks:—The Ms. is in good condition. The author is one Mādhava who calls himself the disciple of Nṛsiṃha. He must be distinguished from the famous Mādhava-Vidyāraṇya.

॥ प्रमेयसंग्रहः ॥

8143. PRAMEYASAṄGRAHAḤ.

Not noticed by Burnell Ms No. 14823.

Substance—Paper. Size—9×4 inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—?. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

स्वायंभुवमनुः स्वदौहित्रं यज्ञनामानं विष्णुं स्तौति ।
'अग्नेनय' इत्यादिना । तदुक्तमीशावास्यभाष्ये—
'स्वायंभुवः स्वदौहित्रं विष्णुं यज्ञाभिधं हरिम् ।
.... तुष्टावावहितात्मना ॥'

End:

एतदुक्तं भवति दूर्वाकाण्डप्ररोहणप्रार्थनेन स्वाश्रयस्य शीतलत्वम् ।....तत्प्रार्थनेन तृषोपशामकस्य जलस्य सत्त्वम् । पुण्डरीकप्ररोहणप्रार्थनेन अतिथिभोग्यस्य फलादेः सत्यम् । समुद्रगृहप्रार्थनेन दाहानर्हतापूर्णतादिकं च प्रतिपाद्यत इति । मापृणन्तो.... ।

Subject: Prameyasaṅgraha.

Remarks:—The Ms. is in good condition.

॥ प्रलयविचारः ॥

8144. PRALAYAVICĀRAḤ.

Not noticed by Burnell Ms. No. 15578.

Substance—Paper. Size—9½ × 4 inches. Sheets—4 (2-5). Lines—6 to a page. Script—Devanāgarī. No. of Granthas—85. Author—? Incomplete. Not Printed.

Beginning:

प्रलयस्त्रिविधः प्रोक्तः मानवः प्रथमः स्मृतः ।
दैनन्दिनो द्वितीयो हि ब्रह्मणो दिवसात्यये ॥
तृतीयो ब्रह्मणस्तत्र लयो ब्राह्म
ब्रह्मणस्तु मुहूर्तेन मनोऽस्तु प्रलयो भवेत्

End:

अथ ब्रह्मप्रलये मनुष्यमानेन शतवर्षमनावृष्टिर्भवति
तदा अन्नाभावेनान्योन्यं भक्षमाणाः प्रजाः क्षयं यान्ति

Subject: Pralayaviṣaya.

Remarks:—The Ms. is in good condition.

॥ बलित्थासूक्तटीका ॥

8145. BALITTHĀSŪKTAṬĪKĀ.

Burnell's Catalogue No. 6174. Page 110. Right column. Substance—Paper Size—9×4 inches. Sheets—5. Lines—10 to a Page. Script—Devanāgarī No. of Granthas—100. Author—? Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

बलित्था। अत्र प्रथमायामृचि पूर्वार्धेन मूलस्वरूपमुक्त्वा द्वितीयार्धेन तदवतारहनुमत्कृत्यमुच्यते।

End:

यद्वार्थव्यत्यासाभावेऽपि क्रमव्यत्यासादवरासु वेदादपकालीनासु उक्तमातृषु विद्यावत्ते नितरां तदर्थमवगमयतीत्यर्थः।

Colophon:

बलित्थासूक्तटीका समाप्ता ॥

Subject: Balitthāsūktaṭīka.

Remarks:—The Ms. is in good condition. This is the dualistic interpretation of Balitthāsūkta.

॥ वैष्णववेदान्तविचारः ॥

8146. VAIṢṆAVAVEDĀNTAVICĀRAḤ.

Not noticed by Burnell Ms. No. 15579.

Substance—Paper. **Size**—$6\frac{1}{3} \times 3\frac{1}{2}$ Sheets—9. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of **Granthas**—90. Author—? Incomplete. Not printed.

Beginning:

श्री लक्ष्मीनृसिंहाय नमः ॥

आनन्दतीर्थचरणं शरणं यामि यद्बलात् ।
अद्वैतिरसनाच्छेदिकर्तरी वाग्विजृम्भते ॥

अन्येऽपि चार्वाकतथागतार्हत-
प्रभाकराक्षाङ्घ्रिकणादकल्पिताः ।
कदागमाः सन्ति तथापि नो तथा
यथाऽयमद्वैतपथो वृथोदयः ॥ २ ॥

स्वपक्षसंरक्षणदक्षमन्य-
पक्षप्रतिक्षेपणदीक्षितश्च ।
अक्षादिकं मानमपेक्षणीयं
विचक्षणैः सद्गुरुलब्धशिक्षैः ॥ ३ ॥

End:

हिरण्यवि.... संनिधौ रजतनिन्दनासंगते
हिरण्य...धमतानुरूपो ततः ।

श्रुता न परिहीयते..........

सदा परि(धि)धारणाच्च सदाग्निहोत्रेऽन्वियात् ॥

Subject: Vaiṣṇavavedānta I and II Prajjvālas.

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off in the middle of the Second Prajjvāla. Though the title misleads one to conclude that this is a work of Viśiṣṭādvaita school, it is written by a Mādhva as the introductory verse proves it.

॥ वैष्णववेदान्तविचारः ॥

8147. VAIṢṆAVAVEDĀNTAVICĀRAḤ.

Not noticed by Burnell Ms. No. 15580.

Substance—Paper. Size—10 × 3½ inches. Sheets—6. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—? Incomplete. Not Printed.

Beginning:

श्री हरिः ॐ ॥

परं ब्रह्मापरं ब्रह्म । एकस्मिन् क्षणेऽनन्ताकाशसंबन्धव-भवति । तच्च देशक्रमेण कालक्रमेणेति वाच्यम् । तथा च यावदव्याकृताकाशापेक्षया एकक्षणांशस्य साम्यं प्राप्तम् । यावत्क्षणस्यानन्त्यं किमिति चिन्तनीयम् ॥

End:

पापात्मनां मद्यमांसाद्यनाद्यसदाचार...यास्य तद्योग-मनाय भगवता कारितत्वेन तदपि भगवतः सुखहेतुरि-

ति विभावितमिति भागवतैकादशस्कन्धगतायाः "लोके व्यवायामिषमद्यसेवा" इत्यादित्रिश्लोक्या....

Subject: Vaiṣṇavavedānta.

Remarks:—The Ms. is in good condition.

॥ वैष्णववेदान्तविचारः ॥

8148. VAIṢṆAVAVEDĀNTAVICĀRAḤ.

Not noticed by Burnell Ms. No. 15581.

Substance—Paper. Size—9⅜ × 3½ inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—? Incomplete. Not Printed.

Beginning:

श्री गुरुभ्यो नमः ॥

ननु यत्तावदुक्तं स्थूलानशनोक्तेरित्यत्र स्थूलस्य जीवभोग्यस्य विषयस्याभोगोक्तेः 'अनश्नन्नन्यः' 'अन्यो निरन्नोऽपि बलेन भूयात्' इत्यादिश्रुतिस्मृतिविरोधो नास्तीति तदसत्।

'जीवभोगस्य भोक्तेशो जीवस्तद्भोगभुङ्न तु।

विविक्तभुगि वा नो....भगवान् पुरुषोत्तमः'

इति षष्ठबृहदारण्यकभाष्ये जीवभोग्यस्य भोक्ता परमेश्वर इत्युक्तया माण्डूकभाष्ये 'स्थूलान् भोगानिन्द्रियैः सशुभान् भुङ्क्ते न चाशुभान्'इति स्थूलभोको(गो)क्तया ऐतरेयभाष्ये–

'आस्यभोग्यं ततो विष्णोरन्नं तौ कुरुतः सदा।

सर्वैर्यत्पूज्यते चाक्षं तत्र तत्र स्थितो हरिः ॥ '

End:

स एषोऽकलोऽमृतो भवति । तदेव श्लोकः । ' अरा

इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः । तं वेद्यं पुरुषं वेद

यथा मा वो मृत्युः परिव्यथाः ' इति तान्होवाच... ।

Subject: Vaiṣṇavavedānta

Remarks—The Ms. is in good condition.

॥ वैष्णववेदान्तविचारः ॥

8149. VAIṢṆAVAVEDĀNTAVICĀRAḤ.

Not noticed by Burnell Ms. No. 15582

Substance—Paper. Size —8 × 3½ inches. Sheets—11 (3-13). Lines—11 to a Page. Script—Devanāgarī. No of Granthas—250. Author—? Incomplete. Not printed.

Beginning:

.. स्त्रोदितत्वादिशास्त्रप्रतिपाद्यत्वे कारणमिति न्याय-

विवरणोक्ते द्वितीयस्त्वज्ञानाप्रतिमानमपि नेतरेषां शास्त्र-

योनित्वमिति भाष्योक्तेः ।

• End:

जन्मादिसूत्रे लक्षणोक्त्या शास्त्रयोनिसूत्रप्रामाण्याद्युक्त्या

....विचार्यमाणत्वेनोपोद्घातत्वायोगात् । ...क्षरार्थस्तु ।

...शब्दस्य हृदयमित्यनेनान्वय...ह । इत्यभिप्रायमिति ॥

श्रीरामचन्द्राय नमः ।

Subject: Vaiṣṇavavedānta.

Remarks:—The Ms. is in good condition.

॥ वैष्णववेदान्तविचारव्याख्या ॥

8150. VAIṢṆAVAVEDĀNTAVICĀRAVYĀKHYĀ.

Burnell's Catalogue No. 6118, Page 110. Left column. Substance- Paper. Size—9⅛ × 4⅜ inches. Sheets—60 (95-174). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2160. Author—? Incomplete. Not printed.

Beginning:

...स्य ध्वनेरेवाभावात्कस्य वर्णव्यञ्जकत्वं स्यादि-
त्याशङ्कया इह निराकरोति । न चेति । कुतो नेत्यतो
ऽनुभवविरोधादित्याह । दूरादिति । एतत्सर्वमिति ।
इदमुक्तं भवतीत्यादिनोक्तं प्रमेयमित्यर्थः ॥ प्रत्यभिज्ञेति ॥

End:

पदार्थस्वरूपत्वाद्भेदस्येत्युक्ते प्रतियोगिनोऽपि पदार्थ-
त्वेन तत्स्वरूपत्वमपि भेदस्याप्नोति । तथात्वे घटाद्घटस्य
भे.... ।

Subject:

कार्यताप्रकरणम् Sheet 111

ब्रह्मतर्कवाक्यम ,, 160

Remarks:—The Ms. is in good condition.

॥ शङ्कामालिका ॥

8151. ŚAṄKĀMĀḶIKĀ.

Not noticed by Burnell Ms. No. 14806.

Substance—Paper. Size—9½ × 3⅞ inches. Sheets—6. Lines—5 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—? Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

अथ शङ्कामालिनी लिख्यते ।

अनादिकालतः सर्वदोषहीना गुणाधिकाः ।
सर्वजीवगुणेभ्यो ये ते हि वायुत्वमाप्नुयुः ॥
इति तात्पर्यनिर्णयदल्लि,
अनादिकालादारभ्य सर्वदोषविवर्जितः ।
ऋजवो नाम ये देवाः .... ॥
यंब वाक्यदल्लि ।

End:

'सुपर्णशेषरुद्राणां सर्वात्रृत्वं विशेषतः ।
प्रायेणात्रृत्वमिन्द्रादेः...... ॥'

इति बृहद्भाष्यप्रमाणादिन्द्रासर्वात्रुत्वसुपर्णादिगळिगे ह्येलिप्रायेणात्रृत्व इन्द्रादिगळिगे अंदरे येनु । उस्वावनात्रुत्वयल्लरग्युसमसर्वात्रुत्वसुपर्णादिगळिगे अंदरे येनु ।

Subject: Śaṅkāmālikā.

Remarks:—The Ms. is in good condition. This Ms. contains notes in Kanarese. This Ms. abruptly breaks off in the middle.

॥ सर्वमूलाद्यन्तश्लोकाः ॥

8152. SARVAMŪLĀDYANTAŚLOKĀḤ.

Burnell's Catalogue No. 6169. Page 107. Right column. Substance—Paper. Size—$3\frac{7}{8} \times 2\frac{1}{2}$ inches. Sheets—14. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —110. Author—? Complete. Printed.

Beginning :

श्री लक्ष्मीनृसिंहो जयतितराम् ।

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

सर्वमूलाद्यन्तश्लोका लिख्यन्ते । हरिः ॐ ॥

आदौ गीताभाष्यम् ।

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्णं गुरूंश्चान्गीतार्थं वक्ष्यामि लेशतः ॥ १ ॥

पूर्णादोषमहाविष्णोर्गीतामाश्रित्य लेशतः ।
निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥ २ ॥

End :

कृष्णस्तुतिः ॥

अम्बरगङ्गाचुम्बितपादः
पदतलविमलितगुरुतरशकटः ।
कालियनागक्ष्वेलनहन्ता
सरसिजनयनो विकसितवदनः ॥

कालघमालीकर्बुरकायः
शरशतशकलितसुररिपुनिवहः ।

सन्ततमस्मान्पातु मुरारिः
सततकलितजवखगपतिनिरतः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिताः सर्वमूलाद्यन्तश्लोकाः स-
माप्तिमगमन् ॥

श्री कृष्णार्पणमस्तु । श्रीगुरुभ्यो नमः ॥

Subject: Sarvamūlādyantaślokā.

Remarks:—The Ms. is in good condition.

This work is an index of the first and last verses of all the works of Ānandatīrtha included in Sarvamūlam. Sarvamūlam is published at Bombay, edited by T. R. Kṛṣṇācārya.

॥ सर्वमूलाद्यन्तश्लोकाः ॥

8153. SARVAMŪLĀDYANTAŚLOKĀḤ.

Not Noticed by Burnell Ms. No. 14824.

Substance—Paper. Size—$8\frac{3}{8} \times 4\frac{3}{8}$ inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—110. Author—?. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8152.

Remarks:—The Ms. is in good condition.

॥ शैवम् ॥

ŚAIVAM.

॥ ब्रह्मसूत्रभाष्यम् ॥

8154. BRAHMASŪTRABHĀṢYAM.

Burnell's Catalogue No. 6280. Page 110. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—160. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4260. Author—Śrīkaṇṭhaśivācārya. Complete. Printed.

Beginning:

ओं नमोऽहं पदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ॥

निजशक्तिभि(र्वि)निर्मित-
निखिलजगज्जालचित्रनिकुरुम्बः ।
स जयति शिवपरमात्मा
सकलागमसारसर्वस्वम् ॥

भवतु भवतां सिद्ध्यै
परमात्मा सर्वमङ्गलोपेतः ।
चिदचिन्मयप्रपञ्चः
शेषोऽशेषोऽपि यस्यैषः ॥

नमः श्वेताभिधानाय नानागमविधायिने ।
कैवल्यकल्पतरवे कल्याणगुरवे नमः ॥

End:

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

* * *

सर्वत्र तद्दर्शिनः तदात्मनः तदीये पदे सर्वगते परमाकाशलक्षणे धाम्नि प्राप्य स्वेच्छागतसकलकामास्तेन सह सदा सर्वत्र विद्योतन्त इति सर्वं समञ्जसमेव ॥

Colophon :

इति श्री नीलकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये
चतुर्थोऽध्यायः ॥

श्वेताचार्यपदद्वन्द्व शुश्रूषाद्योतितात्मना ।
कृतमेतन्महाभाष्यं केवलं भक्तिमात्रतः (?) ॥
यादृशं पुस्तकं + मम दोषो न विद्यते ॥

Subject: Brahmasūtrabhāṣya—known as Śrīkaṇṭhabhāṣya or Brahmamīmāmsābhāṣya

Remarks:—The Ms. is in good condition.

Nīlakaṇṭha Sivācārya the author of the Śaiva Bhāṣya on the Sūtras of Bādarāyaṇa is generally believed to have flourished before Śrī Rāmānuja. Speculation is rife as regards his exact time Some place him even before Śaṅkara. He is also called Śrīkaṇṭha Śivācārya. This work is published along with Sivārkamaṇi Dīpikā and another metrical exposition called Nayamaṇimālā of the famous Appayya Dīkṣita being edited by R. Hālāsyanātha Sastrī together with a commentary called Sūtrārthacandrika in Bhāratamandīram Sanskrit Series in 1918.

॥ ब्रह्मसूत्रभाष्यम् ॥

8155. BRAHMASŪTRABHĀṢYAM.

Burnell's Catalogue No. 9696. Page 110. Right column. Substance—Palm leaf. Size—15×1 inches. Leaves—66. Lines—5-6 to a Page. Script—Nandināgarī. No. of Granthas—1200. Author—Nīlakaṇṭhaśivācārya. Incomplete. Printed.

Beginning:

